CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

8033

॥श्रीकाशीविश्वनाथपुरीमेढुंढराजगणेशकेपास दाऊअग्निहोत्रीके सिद्धविनायकयंत्रमे यो
गसूत्रमणिप्रभाटीकासंयुक्तछापागया लिखावा बूलालशुकुल छापनेवाला दरशन जिस्को
लेनाहोयदाऊअग्निहोत्रीकेदुकानपरमिलैगा ॥ योगसूत्रमणिप्रभाटीकाप्रारम्भः संवत १९३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो॰टी॰ १ श्रीगणेशाय नमः॥ वंदे क्लेशाद्यसंस्पृष्टं पुराणपुरुषं हरिं प्रकृत्यासीनयाजुष्टं योगेशं योगदायिनम् १ पतंजलिं सूत्रकृतं प्रणम्य व्यासं मुनिं भाष्यकृतं च
भक्त्या भाष्यानुगां योगमणिप्रभाख्यां वृत्तिं विधास्यामि यथामतीद्धां २ इह खलु भगवान्पतंजलिः प्रेक्षावत्प्रवृत्त्यंगशास्त्रप्रतिपाद्यं दर्शयति अ
थ अथशब्द आरंभार्थः योगशास्त्रमारभ्यत इत्यर्थः यद्यपि हिरण्यगर्भेण शास्त्रं कृतं तथापि तद्विस्तृतमिति मत्वा तदनुसृतं शास्त्रमारभ्यत इति द्योत
यति अनुशासनमिति अत्र सूत्रे योगः शास्त्रप्रतिपाद्य उक्तः अर्थात्तज्जिज्ञासुरधिकारी फलं तु योगस्य कैवल्यं यथायोगं तेषां संबंध इत्यनुबंधचतुष्ट
यं द्रष्टव्यं तत्र योगो द्विविधः संप्रज्ञातोऽसंप्रज्ञातश्चेति स च चित्तस्य धर्मः वृत्तीनां चित्तधर्मत्वेन तन्निरोधरूपयोगस्यापि तद्धर्मत्वात् तस्य चित्तस्य
पंचभूमयः क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति रजसात्यंतं चलं क्षिप्तं दैत्यानां तमसा निद्रादिमन्मूढं रक्षसां क्षिप्ताद्विशिष्टं विक्षिप्तं देवादीनां अन

अथ योगानुशासनम् १॥ योगश्चित्तवृत्तिनिरोधः २॥ श्री॥०

तचलचित्तस्य कादाचित्कं स्थिरत्वं विशेषः तत्र क्षिप्तमूढयोर्योगगंधोपि नास्ति विक्षिप्ते तु चित्ते कादाचि त्को योगः प्रचुरविक्षेपवन्हिदग्धोऽ
प्रतिष्ठितो निष्फलो न योगपक्षे वर्त्तते एकाग्रे तु सत्वप्रधाने एकविषयस्थिते चित्ते रजस्तमोवृत्तिनिरोधः सात्विकवृत्तिविशेषः संप्रज्ञातयो
गो भवति तेन शब्दानुमानाभ्यां परोक्षत्वेन ज्ञातार्थः साक्षात्क्रियते साक्षात्कारादविद्यादिक्लेशक्षयः ततः पुण्यपापकर्मणां दाहः ततोऽसं
प्रज्ञातो योगः सात्विकवृत्तेरपि निरोधः संस्कारमात्रशेषे निरुद्धचित्ते भवति तदाह भाष्यकारः यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति
क्षिणोति च क्लेशान्कर्मबंधनानि श्लथयति निरोधमभिमुखं करोति स संप्रज्ञातो योग इत्याख्यायत इति अधुना द्विविधस्य योगस्य साधा
रणं लक्षणमाह चित्तस्य रजस्तमोवृत्तीनां निरोधो योग इत्यर्थः अतः संप्रज्ञाते सात्विकवृत्तिसत्वेपि नाऽव्याप्तिः नन्वेकस्य चित्तस्य क्षिप्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यः ऽनेकभूमयः कुत इति चेत् चित्तस्य त्रिगुणात्मकत्वादिति क्रमः चित्तं हि ज्ञानसुखादिशीलत्वात्प्रवृत्तिगुणादिमत्वादालस्यदैन्यादिमत्वाच्च सत्वरजस्त
मोगुणात्मकं भवति तच्च सत्वात्किंचिद्रजस्तमसी मिथः समे यदा भवतः तदा सत्वात्तत्तद्ध्यानाऽभिमुखं भूत्वा तमसा तन्निधाने सति रजसैश्वर्यं कामय
मानं विषयप्रियं भवति विक्षिप्तं यदा तु तमः प्रधानं चित्तं मूढं तदाऽश्रेयोऽधर्माऽज्ञानाऽवैराग्यानैश्वर्यमुपगच्छति अज्ञानमत्र भ्रमो निद्रा च रजः प्र
धानं तु क्षिप्तं इमे क्षिप्तमूढे सर्वसाधारणे भवतः विक्षिप्तं तु प्रथमयोगिनः संति हि चत्वारो योगिनः प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिःऽतिक्रांतभा
वनीयश्चेति तेषां लक्षणं तु वक्ष्यते यदि पुनः सत्वप्रधानं वितमस्कं सरजस्कं भवति तदैकाग्र्यं संप्रज्ञातयोगसिद्धये मध्यमयोगिनो श्चित्तं धर्मज्ञान
वैराग्यैश्वर्यवद्भवति यदा तु विधूतरजस्तमोमलं शुद्धसत्वं चित्तं तदानीं विवेकख्यातिं कृत्वा पुरुषमात्रध्यानं धर्ममेघाख्यं करोति तत्परं प्रसंख्यानमि

तदा द्रष्टुः स्वरूपेऽवस्थानं ३। वृत्तिसारूप्यमितरत्र ४॥

त्याचक्षते ध्यायिनः ध्यानेन चिति शक्तिरपरिणामिन्यऽप्रतिसंक्रमा दर्शितविषया शुद्धा
चानंता चेति निश्चित्य सत्वगुणाविकृतौ विवेकख्यातावऽपि विरक्तं सच्चित्तं तां निरुध्य संस्कारमात्रशेषं भवति चतुर्थस्य योगिनः सोयमऽसंप्रज्ञा
तसमाधिः अत्र हि न हि किंचित्प्र ज्ञायते इत्यऽलं चितिशक्तिरित्याद्यऽनंता चेत्यंतं भाष्यं तत्राप्रतिसंक्रमेत्यस्य विलेसर्पवद्बुद्ध्यादौ प्रविश्यत संच
रतीत्यर्थः बुद्ध्यादर्शितविषया यस्याः सा दर्शितविषया सुखदुःखमोहशून्या शुद्धेत्यर्थः ननु बुद्धिवृत्तिस्वभावस्य पुरुषस्य वृत्तिनिरोधे कथं स्थितिरि
त्यत आह यदा चित्तस्य शांतघोरमूढानां सर्वासां वृत्तीनां निरोधस्तदा द्रष्टुश्चिदात्मनः स्वाभाविके रूपे स्थितिः कुसुमापाये यथा स्फटिकस्य तथे
त्यर्थः पुरुषस्य चैतन्यमात्रं स्वभावो न वृत्तय इति भावः ननु तर्हि व्युत्थाने पुरुषस्य स्वभावात्प्रच्युतिः स्यादित्याशंक्याह इतरत्र निरोधाद्व्युत्थाने प्र
तियाश्चित्तस्य वृत्तयः शांताः घोराः मूढास्तत्सारूप्यं वृत्तिमद्बुद्ध्याऽविवेकात्पुरुषस्य शांतो दुःखी मूढोऽस्मीति वृत्तितादात्म्यभ्रम इत्यर्थः अतो न स्वभावात्

यो॰टी॰
म॰
२

ति:नहिलोहित्यभ्रमकालेस्फटिकस्यम्बेनस्वभावात्प्रच्युतिरस्तीतिभावः निरोधेमुक्तिर्व्युत्थानेवंधइतिसूत्रद्वयतात्पर्यम् ।४। इदानींनिरोद्धव्यानांवृ
त्तीनामियत्तामाह ॥ राजवार्त्तिकेचित्तवृत्तिनिरोधान्व्याख्यातुकामेनसूत्रकारेणसूत्रद्वयेनयस्यनिरोधव्युत्थानयोर्मुक्तिवंधौतच्चित्तमितिव्या
ख्यायवृत्तयइत्यादिनावृत्तीर्व्याख्याय अभ्यासवैराग्याभ्यामित्यादिनापादशेषेणनिरोधोव्याख्यातइतिविशेषउक्तः अवयवार्थस्तयप्रवृत्ति
शब्दोवृत्तिसामान्यपरः चैत्रमैत्रादिचित्तभेदेनवृत्तिसामान्यानांवहुत्वाद्वृत्तयइतिवहुवचनम् अग्रिमसूत्रोक्ताः प्रमाणादयः पंचविशेषावृत्तिसा
मान्यस्यावयवाइत्यर्थः पंचअवयवायासांताःपंचतय्यः तासांहानोपादानसिद्धयेभेदमाह क्लिष्टाअक्लिष्टाइति रागद्वेषादिक्लेशानांहेतवःक्लिष्टाः
वंधफलाः सर्वोहिजंतुःप्रमाणादिवृत्तिभिर्ज्ञातेष्वर्थेषुरागादिनाकर्मकृत्वासुखादिनावध्यते अक्लिष्टाः क्लेशनाशिन्योमुक्तिफलाःसत्वपुरुषा

वृत्तयःपंचतय्यःक्लिष्टाअक्लिष्टाः ५ प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ६ प्रत्यक्षानुमानागमाःप्रमाणानि ७ ॥ ॥०

न्यतागोचराःताःखल्वभ्यासवैराग्याभ्यांक्लिष्टवृत्तिप्रवाहमध्येजायमानाः स्वजन्याक्लिष्टसंस्कारैःपुनःपुनरभ्यासेनप्रवृद्धैःक्लिष्टसंस्कारनिरो
धेनक्लिष्टवृत्तिप्रवाहंनिरुध्यपरवैराग्येणस्वयंनिरुध्यंतेततःसंस्कारशेषस्यचित्तस्यप्रलयोमुक्तिर्भवतीतिभावः ।५। पंचवृत्तीरुद्दिशति इतोन्यावृत्ति
र्नास्तीत्युद्देशसूत्रस्यफलम् ।६। तत्रप्रमाणवृत्तिंविभजते त्रीण्येवप्रमाणानीतिभावः अत्रप्रमाकरणत्वंसामान्यलक्षणंप्रमाचाऽज्ञातार्थाऽवगाही २
पौरुषेयोवोधोवृत्तौप्रतिविंवस्तत्करणंवृत्तिः तत्रेंद्रियसंवंधद्वाराचित्तस्यघटादिसंवंधेसतिसामान्यविशेषात्मकेऽर्थेव्यक्तिरूपविशेषनिर्द्धारण
प्रधानावृत्तिःप्रत्यक्षंप्रमाणं तत्राऽर्थाकारायांवृत्तौचिदात्मनोयःप्रतिविंवःसोऽपिवृत्तिद्वारा अर्थाकारःसन्फलंभवति। एवंसामान्यतोज्ञातेपरोक्षार्थे
सामाधिना विद्यमानंविशेषवृत्तिःप्रत्यक्षप्रमाणमितिज्ञेयं अनुमानाऽगमयोर्व्याप्तिसंगतिग्रहापेक्षत्वाद्वन्हित्वादिसामान्येनद्वहात्सामान्यविषय

CC-0. In Public Domain. Digitization by eGangotri

त्वमेव। तत्रव्याप्तिग्रहे सतिपक्षवृत्तिलिंगज्ञानात्साध्यताऽवच्छेदकसामान्यनिर्द्धारणवृत्तिरनुमानं आप्तेन दृष्टोऽनुमितोवार्थोयेनशब्देनोपदि
श्यते तस्माच्छब्दाच्छ्रोतुस्तदर्थविषया वृत्तिरागमः वेदस्याप्ते स्वप्रणीतत्वं वक्ष्यते विपर्ययंलक्षयति (त) ॥ तद्रूपे स्वविषये प्रतिष्ठाशू
न्यबाधविरोधीतियावत् विकल्पोपिबाधविरोधीतद्रूपाऽप्रतिष्ठइत्यऽतिव्याप्तिनिरासाय मिथ्याज्ञानपदं तेनस्वविषये स्वजन्यव्यवहारलोपिस
र्वसंमतबाधवत्वमुच्यते। नचविकल्पेतादृशबाधोस्तिकेषांचित्पण्डितानां तत्रबाधबुद्धावपियथापूर्वंव्यवहारालोपात् संशयस्तुलक्ष्यएवेति नातिव्या
प्तिरितिभावः अस्यैवविपर्ययस्यभेदाः पंचक्लेशाइतिवक्ष्यते विकल्पंलक्षयति। नृशृंगादिश्रवणानंतरमवश्यंभवंत्येव निर्विषयावृत्तिर्यासविक
ल्पइत्यर्थः अयंविकल्पोवस्तुशून्यत्वान्नप्रमाणं बाधेप्यवश्यंभावित्वात् व्यवहारहेतुत्वाच्च नविपर्ययः यथा चैतन्यमेवपुरुषइत्यभेदनिश्चये
पिपुरुषस्यचैतन्यमितिभेदविकल्पः भावातिरिक्ताभावोनास्तीति निश्चयेपिसर्वधर्माभाववान्पुरुषइतिविशेषणविशेष्यभावविकल्पः एवंराहोःशि

विपर्ययोमिथ्याज्ञानमतद्रूपप्रतिष्ठम्८ शब्दज्ञानानुपातीवस्तुशून्योविकल्पः९ अभावप्रत्ययालंबनावृत्तिर्निद्रा१०

रइत्यादिविकल्पाउदाहार्याः निद्रांलक्षयति कार्यप्रत्य अनुभूतविषयाऽसंप्रमोषःस्मृतिः११ यतेगच्छतीतिप्रत्ययोहेतुः जाग्रत्स्वप्नवृत्तीनाम
भावेहेतुस्तमः आलंबनंविषयोयस्याः सावृत्तिर्निद्रा वृत्तिपदस्याऽनुवर्तमानस्योच्चारणं ज्ञानाभावोनिद्रेतिमतनिरासार्थं तथाहि उत्थितस्यसुखमऽ
हमस्वाप्समितिस्मरणाद्बुद्धिसत्वसचिवतमोविषयं तदनुभवंकल्पयति दुःखमहमस्वाप्समितिस्मरणाद्रजस्तमोविषयं तदनुभवं गाढंमूढमह
मस्वाप्समितिकेवलतमोविषयंस्मरणात्तदनुभवंकल्पयतिस चाऽनुभवोबुद्धिधर्मोनिद्रा साचैकाग्रवृत्तिकल्पापितामसत्वाद्योगार्थिनानिरो
द्धव्येतिभावः स्मृतिंलक्षयति प्रमाद्यनुभवोपिस्मृतेःपिता तस्यविषयः स्मृतेरात्मीयः लोकेपितुःस्वमिवपुत्रस्यस्मृतेर्मूलानुभवाविषयस्तुप =
रस्वं तद्ग्रहः संप्रमोषःस्तेयः तथाचाऽनुभूतेविषयेयोयमसंप्रमोषः अधिकाग्रहः अनुभूतमात्रग्रहइतियावत् सास्मृतिरित्यर्थः वृत्तिस्थःयोऽ ६

बोधोऽनुभवः स्वप्रकाश इति तज्जन्यसंस्कारादनुभवविषयास्मृतिर्भवति ननु स्वकार्येगजवैशिष्ट्यमननुभूतमपि स्वप्ने स्मर्यत इति चेन्न तस्य विपर्ययत्वा
दिति भावः आसां वृत्तीनां निरोधोपायमाह सर्वस्य जंतोः स्वभावतश्चित्तवृत्तिनदी विषयभूमिगा संसारसागराऽभिमुखी प्रवहति तत्र विषये वैराग्येण ता
त्सवाहं भंक्त्वा सत्पुरुषविवेकाभ्यासेन तस्या नद्याः प्रत्यक्प्रवाहः क्रियते अनभ्यासे हि लयविक्षेपस्वभावस्य चित्तस्य वैराग्याद्विक्षेपभंगे निद्रास्या
तस्मादभ्यासवैराग्ये लयविक्षेपनिवृत्तिरूपप्रयोजनभेदेन निरोधे कार्ये समुच्चीयेते अभ्यासस्वरूपमाह तत्रेति यो मध्ये रजस्तमोवृत्तिशून्यस्य
चित्तस्यैकाग्रता स्थितिः तस्यां कार्यायां यानि साधनानि यमनियमादीनि तद्विषयः प्रयत्नोऽनुष्ठानं सम्भ्यास इत्यर्थः ननु अनादिप्रबलराजसता
मसवृत्तिसंस्कारैर्विरोधिभिः कुंठितोऽभ्यासो न स्थित्यै कल्पत इत्यत आह तु शब्दः शंकानिरासार्थः सोऽभ्यासो दीर्घकालं तपो ब्रह्मचर्यविद्या

अभ्यासवैराग्याभ्यां तन्निरोधः १२ तत्र स्थितौ यत्नोऽभ्यासः १३ स तु दीर्घकालनैरंतर्यसत्कारासेवितो दृढभूमिः १४ दृष्टाऽनु

श्रद्धारूपसत्कारेण नैरंतर्येण चाऽऽसेवितो दृ श्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् १५ ढसंस्कारः सन्व्युत्थानसंस्कारैर्नाभिभू
यते। किं तु स्थितिसमर्थो भवतीत्यर्थः अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्येति श्रुतिः सत्कारं दर्शयति वैराग्यस्वरूप
माह यतमानव्यतिरेकैकेंद्रियवशीकारसंज्ञाश्चतस्रः तत्र रागादीनां चित्तस्थानां कषायाणां विषयेष्विंद्रियप्रवर्तकानां पाकाय प्रयत्नो यतमान
संज्ञा वैराग्यं ततः पक्वानां केषांचित्कषायाणां पक्ष्यमाणेभ्यो विभागाऽवधारणं व्यतिरेकसंज्ञा वैराग्यं ततः पक्वानां सर्वेषामिंद्रियप्रवर्तनाशक्ता
नां मनस्यौत्सुक्यरूपेणावस्थानमेकेंद्रियसंज्ञा वैराग्यं स्त्रियोऽन्नपानमित्यादिषु दृष्टेषु गुरूच्चारणमनुश्रवः श्रवणं यस्य सोऽनुश्रवो वेदः
तदुक्तेष्वानुश्रविकेषु स्वर्गादिदिव्यादिव्यविषयेषु विनाशपरितापसातिशयत्वाद्यादिदोषाणामभ्यासेन साक्षात्काराद्वितृष्णस्योपेक्षाबु
द्धिर्वशीकारसंज्ञा वैराग्यमित्यर्थः अपरं वैराग्यमुक्त्वा परं वैराग्यमाह॥ ॥०

CC-0. In Public Domain. Digitization by eGangotri

पूर्वंवैराग्यमुत्तरंवैराग्येहेतुः तथाहिवस्यमाणयोगांगाऽनुष्ठानादनुष्ठानाद्ऽनुतिशुद्धचित्तस्यविषयेषुदोषदर्शनाद्वशीकारसंज्ञकंवैराग्येस
तिगुर्वागमाऽवगतस्यपुरुषस्यपारव्यातिस्तदऽभ्यासाद्धर्ममेघाऽख्यध्यानरूपान्निर्ताभविध्वस्तनमोरजोमलंचित्तंसत्वमात्रशेषमऽतिप्रसन्नं
भवतिसोयंमतिशुद्धचित्तधर्मः प्रसादोधर्ममेघस्योत्तरावधिः तस्यैवफलीभूतः परंगुणेभ्योवैतृष्ण्यंवैराग्यमुच्यते यन्मुक्तिहेतुसाक्षात्कारंव
दंतिमोक्षविदः यस्योदयेप्रक्षीणसर्वक्लेशोविधूताशेषकर्माऽशयः कृतविवेकाख्यातावऽप्युपेक्षकः कृतकृत्यंप्राप्तंप्रापणीयमितिमन्यतेयो
गी यदऽनंतरमेवचित्तमसंप्रज्ञानसंस्कारमात्रशेषंभवतितन्परंवैराग्यंअपरंतुवैराग्यंवितमस्करयरजोलेशमलस्यचित्तस्यधर्मः यतःप्रकृतौ
लीनाऐश्वर्यमऽनुभवंतियथोक्तंवैराग्यात्प्रकृतिलयइतिएवमऽभ्यासवैराग्येनिरूप्यतत्साध्यंनिरूपयन्नाऽदौसंप्रज्ञातंचतुर्विधंदर्शयति यथाह

तत्परंपुरुषख्यातेर्गुणवैतृष्ण्यं १६ वितर्कविचारानंदाऽस्मितारूपाऽनुगमात्संप्रज्ञातः १७ ॥ श्री॥० श्री॥०

केप्राथमिकधानुष्काः स्थूलमेवलक्ष्यंविध्यंतिपश्चात्सूक्ष्मंतथाप्राथमिकोयोगीस्थूलमेवशालग्रामादिकंध्यानेनसाक्षात्करोतिसस्थूलसा
क्षात्कारोवितर्कः तस्यस्थूलस्यकारणंपंचतन्मात्रादिकंसूक्ष्मंतस्यध्यानेनसाक्षात्कारोविचारः इंद्रियाणिस्थूलानिप्रकाशकत्वात्सत्वरूपा
णितेषांध्यानेनसाक्षात्कारआनंदस्तेषांकारणंबुद्धिः।पुरुषेणग्रहीत्रैकीभूतासत्यऽस्मितातस्याध्यानेनसाक्षात्कारोऽप्यस्मितोच्यते तत्र
स्थूलंसूक्ष्मंचग्राह्यमिंद्रियाणिग्रहणानिअस्मिताऽस्योग्रहीतातेषुग्रहीतृग्रहणग्राह्येषुध्यानपरिपाकः संप्रज्ञातोयोगः सचवितर्कविचा
चाराऽनंदाऽस्मितास्वरूपैश्चतुर्भिरऽनुगमाच्चतुर्विधः सवितर्कः सविचारः सानंदः साऽस्मितइति अत्रयथाघटज्ञानंमृद्विषयंतादात्म्यात्तथाऽ
स्थूलयोगः स्थूलसूक्ष्मेंद्रियास्मिताविषयकः सूक्ष्मयोगस्त्रयविषयकः अन्योद्वेकविषयाविति विशेषोभाष्यकृद्भाषितः तत्रमृद्ज्ञानं
घटाऽविषयंयथातद्वत्सूक्ष्मादियोगाःस्थूलाऽद्यविषयाइतिमंतव्यंभोजवृत्तौतुइंद्रियेषुसवितर्कसुखाहंकारेसाऽनंदोमहत्तत्वेसाऽस्मितइत्यु

तन्नाहमितिविषयग्राहकोऽतःकरणेऽमहंकारः अंतर्मुखंसत्तामात्रेमहत्तत्वेलीनेसत्तामात्राऽवभासकमऽस्मितेतितयोर्भेदः ग्रहीतापुरुषः अधुना
सोपायमसंप्रज्ञातमाह वृत्तीनामऽभावोविरामः तस्यप्रत्ययः कारणंपरवैराग्यंतदभ्यासः पूर्वः उपायोयस्यसतथा अनेनपदेनोपायउक्तः अ।
न्योऽसंप्रज्ञातःसंस्कारशेषः परंहिवैराग्यंसंप्रज्ञातसंस्कारानऽप्यऽभिभूयस्वसंस्कारशेषयतिसनिर्वीजः समाधिः निरालंवनत्वात्कर्मवीजाभा
वाच्चेत्यर्थः अयमसंप्रज्ञातोद्विविधः भवप्रत्ययः उपायप्रत्ययश्चतत्राद्योमुमुक्षुभिर्हेयः तमाह॥ भूतेंद्रियाणामऽन्यतमस्मिन्विकारेऽनात्मन्यात्म
त्वभावनयादेहपातानंतरंभूतेंद्रियेषुलीनाः षाट्कौशिकदेहशून्याविदेहाः अव्यक्तमहदऽहंकारपंचतन्मात्रेषुप्रकृतिष्वात्मत्वभावनयालीनाः
प्रकृतिलयाः तेषांचित्तंसंस्कारमात्रशेषमित्यऽसंप्रज्ञातः सतुभवप्रत्ययः भवंतिजायंतेऽस्यांजंतवइत्यविद्याभवः अनात्मन्यात्मत्वबुद्धिःस
प्रत्ययोहेतुर्यस्यसतथा अविद्यामूलोयंयोगोनतत्फलः यदाऽहवायुः।दशमन्वंतराणीहतिष्ठंतींद्रियचिंतकाः भौतिकास्तुशतंपूर्णंसहस्रं।

विरामप्रत्ययाभ्यासपूर्वःसंस्कारशेषोऽन्यः १८ भवप्रत्ययोविदेहप्रकृतिलयानां १९ श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापू
र्वकइतरेषां २० ॥

त्वाभिमानिकाः वौद्धादशसहस्राणितिष्ठंतिविगतज्वराः पूर्णंशतसहस्रंतुतिष्ठंत्यव्यक्तचिंतकाः पुरुषंनिर्गुणंप्राप्यका
लसंख्यानविद्यतइतियेषांविवेकख्यातिर्नास्तितेषांचित्तंलीनमप्युत्थायसंसारेपतनितिसुप्तवित्तवदितिभावः अधुनाद्वितीयमुपादेयमाह ॥
पुरुषगोचरासात्विकीश्रद्धातयावीर्यंप्रयत्नोजायतेतेनयमनियमादिपरंपरयास्मृतिर्ध्यानंतेनसमाधिः तेनप्रज्ञापुरुषगोचराख्यात्यऽभ्या
सः संप्रज्ञानस्ततः परवैराग्यादऽसंप्रज्ञातः इतरेषांमुमुक्षूणांयोगिनांभवंतिश्रद्धादयः प्रज्ञांऽताउपायास्तत्पूर्वकोयमुपायप्रत्ययः तेचोपायाः प्राणि
नांप्राक्संस्कारवलान्मृदुमध्याऽधिमात्रभेदात्त्रिविधास्तथाचयोगिनस्त्रयोभवंति मृदूपायोमध्योपायोऽधिमात्रोपायइति तत्रमृदूपायस्त्रिविधः
मृदुसंवेगोमध्यसंवेगस्तीव्रसंवेगइति एवमितरावऽपित्रिविधौभवतः एवंचनवयोगिनोभवंतितेषांचिरंचिरतरंक्षिप्रंक्षिप्रतरंसिद्धयोभवंति॥०

CC-0. In Public Domain. Digitization by eGangotri

उपायतारतम्यात्तत्रकेषांचितक्षिप्रतरंसिद्धिरित्यतआह संवेगोवैराग्यंयेषांतीव्रउपायास्त्वाऽधिमात्रास्तेषांयोगिनामासन्नः समाधिरऽसंप्रज्ञातस्त
तोमोक्षइत्यर्थः तीव्रस्य संवेगस्याऽपि मृदुमध्याधिमात्रत्वात्ततोमृदुतीव्रसंवेगस्ययोगिनआसन्नात्समाधेर्मध्यतीव्रसंवेगस्यासन्नतरादधिमा
त्रतीव्रसंवेगस्यासन्नतमः समाधिलाभइतिविशेषइत्यर्थः ईश्वरेकायिकाद्वाचिकान्मानसात्प्रणिधानाद्भक्तिविशेषादासन्नतमः समाधिला
भः वाशब्दः पूर्वोक्तोपायेनास्यभवत्युपायस्यविकल्पार्थः भक्तेरन्याऽनपेक्षत्वादीश्वरोहिभक्तयाभिमुखः सन्निदमिष्टमस्यास्त्वित्यनुगृह्णातीतिभावः १२३
ईश्वरस्वरूपन्निरूपयति क्लेशाःअविद्यादयः पंचकर्मधर्माधर्मौतयोः फलंविपाकः फलानुकूलाः संस्काराआशयाः मनस्याशेरतइतिव्युत्प
त्तेः यथानरस्यकरिजन्मनिकाष्ठभोगसंस्काराउद्भवन्तिअन्यथाजीवनासंभवात्तैः क्लेशादिभिश्चित्तस्थैः परामृष्टः संसारिकः पुरुषश्चित्ताऽविवे
केनभोक्तृत्वात्तैः कालत्रयेप्यऽसंबद्धः पुरुषईश्वरः विशेषपदेनकालत्रयाऽसंबंधवाचिनामुक्तजीवेभ्योव्यावृत्तिःकृता तेषांपूर्वकालबंधत्रयसं

तीव्रसंवेगानामाऽसन्नः २१ मृदुमध्याऽधिमात्रत्वात्ततोपिविशेषः २२ ईश्वरप्रणिधानाद्वा २३ क्लेशकर्मविपाकाशयैरपरा
मृष्टः पुरुषविशेषईश्वरः २४॥

बंधात्प्रकृतौलीनानांप्राकृतोबंधःभूतेंद्रियेषु विकारेषुलीनानांविदेहानांवैकारिकः अन्येषांदेवनरा
दीनांदक्षिणाबंधः चित्ताधीनकर्मफलत्वादितिभेदः नत्वज्ञानक्रियाशक्तिमत्वंपरमैश्वर्यंपुरुषस्यापरिणामिनः कथमित्युच्यतेअस्तिईश्वरस्याना
दिसिद्धंशुद्धसत्वात्मकंचित्तंप्रधानजंनिरतिशयज्ञानक्रियाशक्तिमत्सहिभगवान्संसाराणवाज्जन्तूनामुद्धरणेछयातच्चित्तमुपादत्ते तद्विनाज्ञानध
र्मोपदेशभक्तानुग्रहाऽयोगात्ननुकथंचित्तोपादानात्प्रागिच्छाद्युदेतीतिवाच्यमबीजांकुरवदनादित्वात्सर्गप्रलयप्रवाहस्ययदासर्वकार्यस्यप्र
लयस्तदाभविष्यत्कल्पेलोकानुग्रहार्थमिदंचित्तमुपादेयमितिभगवतासंकल्प्यतेतत्संकल्पवासितंप्रधानेलीनंसत्सर्गादौचित्तमुद्भवतितेनचे
श्वरोनुगृह्णातीत्यऽनवद्यंननुतादृशचित्तसत्वेकिंमानमितिचेत्स्वाभाविकीज्ञानबलक्रियाचएषसर्वेश्वरइत्यादिवेदवाक्यमितिक्रमः वेदोनिरतिशय

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानशक्तिविशिष्टेश्वरप्रणीतः अतः प्रमाणमिति संक्षेपः एवं वेदप्रामाण्यात्सिद्धः सर्वज्ञ ईश्वरः तस्य सर्वज्ञत्वेऽनुमानमप्याह अस्मदादीनां ज्ञानं निरतिश
येन ज्ञानेनाविना ऽभ्यस्तं भवितुमर्हति सातिशयत्वात् यत्सातिशयं तत्समानजातीयेन निरतिशयेन युक्तं यथा कुंभपरिमाणं विभुपरिमाणेन तत्स्मि
न्नं निरतिशयं ज्ञानं सर्वज्ञस्य बीजं ज्ञापकं यत्र निरतिशयं ज्ञानं तत्र सर्वज्ञत्वं ज्ञायत इत्यर्थः तस्य सामान्येन सिद्धस्य सर्वज्ञस्य श्रुत्यादिसिद्धाः शिवविष्णु
नारायण महेश्वरादिसंज्ञाः तथा च वायुपुराणे सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तशक्तिः अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि म
हेश्वरस्य। ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च अव्ययानि दशैतानि नित्यं तिष्ठंति शंकरे इति तथा महाभा
रते अनादिनिधनं विष्णुं सर्वलोकमहेश्वरं लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेदित्यादि तस्य भगवतो ब्रह्मादिभ्यो विशेषमाह पूर्वेषां सर्गादावुत्प
न्नानां कालपरिच्छिन्नानां गुरुरीश्वरः कुतः कालेनाऽनवच्छेदात् अनादित्वादित्यर्थः तथा च श्रुतिः यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति

तत्र निरतिशयं सर्वज्ञबीजं २५ पूर्वेषामपि गुरुः कालेनानवच्छेदात् २६ तस्य वाचकः प्रणवः २७ श्री॥० श्री॥०

तस्मै इत्याद्या। एवमीश्वरं निरूप्य तत्प्रणिधानं वक्तुं तस्य रहस्यसंज्ञामाह सुगमं सूत्रं ननु शब्दस्य वाचकत्वमभिधाख्या शक्तिः शब्दार्थयोः संबंध इत्यु
च्यते। सा किं संकेतेन क्रियते व्यज्यते वा नाद्यः प्रतिकल्पं स्वतंत्रेश्वरस्य संकेतभेदेन शब्दाऽर्थाव्यवस्थाप्रसंगात् न द्वितीयः सूर्यादिशब्दानां पुत्रेषु पि
त्रासंकेतवैफल्यात् नहि तत्र संकेतव्यंग्या शक्तिरस्ति न चासति व्यंग्ये व्यंजकमर्थवत् तस्मादिदं संकेतसूत्रं व्यर्थमिति चेदुच्यते स्थितैव शक्तिः
संकेतेन व्यज्यते यथा स्थित एव पितृपुत्रभावो ममायं पुत्र इति वाक्येन व्यज्यते तद्वद्गवादिशब्देषु प्रलये प्रधानसाम्यं गतेषु सर्गादौ पुनः शक्त्यास ५
होद्भूतेषु स्थितामेव तत्तच्छब्दस्य तत्तदर्थे शक्तिमीश्वरः संकेतेन ज्ञापयते जीवानां लुप्तसंस्कारत्वात् अधुनातनपित्रादिसंकेतस्तु शक्तेरुत्पादकः को
चित्तु सर्वशब्दानां सर्वार्थेषु शक्तिरस्तीति पित्रादिसंकेतोऽपि व्यंजकः गवादिशब्दानां तु वेदार्थव्यवस्थार्थमीश्वरसंकेतेनाऽर्थविशेषे शक्तिर्निय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यतइत्याहुः सर्वथापि वैदिकशब्दार्थसंबंधोऽव्यवस्थितव्यवहारतया नित्यइति सिद्धम् एवं वाचकमुक्त्वा प्रणिधानमाह अस्यभाष्यमेव लिख्यते प्रण-
वस्य जपः प्रणवाभिधेयस्य चेश्वरस्य भावनं तदऽस्य योगिनः प्रणवं जपतः प्रणवार्थं च भावयतः चित्तमेकाग्रं संपद्यते तथा चोक्तं स्वाध्यायाद्योगमा-
सीत योगात्स्वाध्यायमामनेत् स्वाध्याययोगसंपत्त्या परमात्मा प्रकाशत इति २७। तस्येश्वरप्रणिधानस्याऽसन्नतमः समाधिलाभः फलमिति पूर्वमुक्तं अ-
धुना फलांतरमपि तदनुगुणमाह प्रतीपविपरीतमंऽचति जानातीति प्रत्यगआत्मा इत्यर्थः अनेनेश्वराद्भिदउक्तः बुद्धेरप्यांऽतरो वा प्रत्यक् स चा-
सौ चेतनश्च तस्याधिगमः साक्षात्कारः ततः प्रणिधानाद्भवति अपि चांऽतरायाणामभावश्च भवति ननु स्वभिन्नेश्वरप्रणिधानात्स्वसाक्षात्कारः कथं
स्यात् अभ्यासतज्ज्ञानयोः षड्गादऽवेकविषयत्वदर्शनादिति चेदुच्यते यथैवेश्वरोऽसंगश्चिद्रूपः कूटस्थः क्लेशादिशून्यस्तथैव जीव इति सादृश्या-
दीश्वरध्यानं ततः दनुग्रहद्वाराऽजीवस्वरूपसाक्षात्कारहेतुरित्यनवद्यं अंतरायानाह ये चित्तं योगाद्विक्षिपंति भ्रंशयंति ते चित्तविक्षेपाः योगस्यां-

तज्जपस्तदऽर्थभावनं २७ ततः प्रत्यक्चेतनाऽधिगमोऽप्यंतरायाभावश्च २८ व्याधिस्त्यानसंशयप्रमादाऽलस्याऽविरतिभ्रांतिद-
र्शनाऽलब्धभूमिकत्वाऽनवस्थितत्वानि चित्तविक्षेपास्तेंऽतरायाः २९ दुःखदौर्मनस्यांऽगमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः

तरायाः विघ्ना नवैव तत्र व्याधिर्वातपित्तश्लेष्मणामन्नरसस्येंद्रियाणां च वैषम्यं स्त्यानं चित्तस्य लघुत्वेऽपि कर्माऽनर्हता संशयः प्रसिद्धः योगांगाऽननुष्ठानं
प्रमादः आलस्यं चित्तस्य गुरुत्वादऽप्रवृत्तिः अविरतिर्विषयतृष्णा भ्रांतिदर्शनमेककोटिको विपर्ययः अलब्धभूमिकत्वं समाधिभूम्यऽलाभः मधु-
मत्यादयः समाधिभूमयो वक्ष्यंते अनवस्थितत्वं नाम लब्धायां भूमौ चित्तस्याऽस्थिरत्वं पूर्वभूमौ हि स्थितं चित्तं उत्तरभूमिं जयेत् तस्मादऽस्थिरत्वं दोष
इत्यऽर्थः न केवलमेते विक्षेपा योगनाशकाः किंतु दुःखादीनऽपि कुर्वंतीत्याह॥ दुःखं व्याधिजं शारीरं कामादिजं मानसं तद्द्वयमाध्यात्मिकं व्या-
घ्रादिजमाधिभौतिकं ग्रहपीडादिजं आधिदैविकं दौर्मनस्यमिच्छाविघातात् क्षोभो मनसि अंगमेजयतो भावो अंगमेजयत्वमंऽगानां कंप

नमित्यर्थः अनिच्छतः प्राणोयंवाह्यवायुमंऽतः प्रवेशयतिसश्वासः समाध्यंऽगरेचकविरोधीत्यऽर्थः एवमऽनिच्छतः कोष्ठ्यस्यवायोर्वहिर्गमनंप्रश्वासः पूरकविरोधीएतेविक्षेपैः सहभवंतिविक्षिप्तचित्तस्यभवंतीत्यर्थः ईश्वरप्रणिधानादेतेषाऽमभावमित्युक्तमुपसंहरति विक्षेपानांनाशार्थमेकतत्त्वस्येश्वरस्याऽभ्यासोध्यानंकार्यमित्यर्थः अत्रभाष्यकारैः स्थायिचित्तंस्यानस्यैकाग्रतासंपादनीयेतिक्षणिकमतमाशंक्यसोऽहमितिप्रत्यभिज्ञानादिनाचित्तमेकमऽनेकाऽर्थावगाहिस्थायिविद्यतेइतिसाधितंतस्यचित्तस्याऽसूयादिमलवतोयोगाऽनुष्ठानायोगात्तन्मलनिरासोपायानाह सुखिषुप्राणिषुमैत्रींमित्रतांदुःखितेषुकरुणांदयांपुण्यवत्सुमुदितांहर्षंअपुण्यशीलेतपापवृत्तिषु उपेक्षांमध्यस्थवृत्तिंभावयेत् तयाभावनयाचित्तस्यप्रसादनंभवतिसुखादिषुयथाक्रमसुक्तया भावनयासात्त्विकोधर्मोजायतेतेनश्चैषोपकारेच्छाऽसूयाद्वेषाणांचित्तमलानांविनाशात्तेनचशुक्लेनधर्मेणचित्तप्रसन्नंभवतिप्रसन्नंचवक्ष्यमाणेभ्यउपायेभ्यः एकाग्रस्थितिपदंलभनइतितात्पर्यंइदानींमैत्र्यादिभावनयाप्रसन्नस्यचित्तस्यस्थित्युपाया

नत्प्रतिषेधाऽर्थमेकतत्वाऽभ्यासः ३१ मैत्रीकरुणामुदितोपेक्षाणांसुखदुःखपुण्याऽपुण्यविषयाणांभावनातश्चित्तप्रसादनं ३२॥
प्रच्छर्दनविधारणाभ्यांवाप्राणस्य ३३ विषयवतीवाप्रवृत्तिरुत्पन्नामनसःस्थितिनिबंधनी ३५

ऽऽ नाह नासिकापुटाभ्यांप्राणस्यप्रच्छर्दनंरेचनंरेचितस्यप्राणस्यवहिरेवविधारणंयथाशक्तिताभ्यांचित्तमेकत्रलक्ष्येस्थितिंलभतेप्राणजयेचित्तस्यजयस्तयोरविभागात्प्राणायामस्यसर्वपापनिवर्तकत्वात्पापनिवृत्तौचित्तंस्थिरंभवतिवाशब्दोवक्ष्य माणोपायांतरापेक्षयाविकल्पार्थः नतुमैत्र्यादिभावनाऽपेक्षयातद्भावनायाःसर्वोपायसहकारित्वेनसमुच्चयादितिमंतव्यंउपायांतरमाह नासाग्रेचित्तस्यसंयमाद्दिव्यगंधसंक्षात्कारोभवतिजिह्वाग्रेसंयमाद्दिव्यरसस्यसंविद्भवतितालुनिरूपसंवित्जिह्वामध्येस्पर्शसंवित्जिह्वामूलेशब्दसंवित्एताःसंविदोगंधादिविषयवत्यःप्रवृत्तयःशीघ्रमुत्पन्नाःसत्योविश्वासमुत्पादयंतिसूक्ष्मेश्वरादौलक्ष्येमनसःस्थितिंनिवध्नंतीत्यर्थःशास्त्रोक्तविशेषस्यकस्यचिदऽनुभवेसत्यऽतिसूक्ष्मेऽपिश्रद्धयासंयमार्थयोगीप्रवर्तते

CC-0. In Public Domain. Digitization by eGangotri

अष्टदलं हृत्पद्मं रेचकेनोर्ध्वमुखं ध्यात्वा तत्कर्णिकास्थायां ऊर्ध्वमुख्यां सुषुम्नाख्यनाड्यां संयमनात्मनसः संविद्भवति तन्मनः सूर्येन्दुग्रहमणीनां प्राया
प्रभातद्रूपेणानेकधा भवति तत्सात्विकं ज्योतिर्मनः तस्य कारणं सात्विकोऽहंकारो निस्तरंगमहोदधिकल्पो व्यापी तस्याऽपि ज्योतिःस्वरूपस्य सं य
मात्संविद्भवति सैषा द्विविधा संवित् ज्योतिष्मती मनोऽहंकाराऽख्या ज्योतिर्विषया विशोका दुःखशून्या प्रवृत्तिरुत्पन्ना मनसः स्थितिहेतुरित्यर्थः ॥ २९॥
व्यासशुकादीनां वीतरागं यच्चित्तं तद्विषयं तत्र धार्यमाणं योगिनश्चित्तं स्थितिपदं लभत इत्यर्थः ज्ञानशब्दो ज्ञेयपरः स्वप्ने भगवतो मूर्तिमत्यंतमनोहरा
माऽराधयन्नेव प्रबुद्धः तत्रैव चित्तं धारयेत् निद्रायां सुषुप्तौ यत्सुखं जायते तत्र धारयेत् एवं स्वप्ननिद्राज्ञेयाऽलंबनं चित्तं स्थितिं लभते किं बहुना यदेवे
ष्टं शिवरामकृष्णादिरूपं तदेव ध्यायेत् तत्र लब्धस्थितिकं मनोऽन्यत्राऽपि स्थितिं लभते अभिमतमनतिक्रम्य यथाभिमतं तस्य ध्यानादिति विग्रहः ननु

विशोका वा ज्योतिष्मती ३६ वीतरागविषयं वा चित्तं ३७ स्वप्ननिद्राज्ञानालंबनं वा ३८ यथाभिमतध्यानाद्वा ३९ परमाणुपरमम
हत्वांतोऽस्य वशीकारः ४० क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदंजनता समापत्तिः ४१

चित्तस्थितिर्जायत इत्य
त्र किं ज्ञापकमित्यत आह अस्य चित्तस्य सूक्ष्मे निविशमानस्य यः परमाण्वंतो वशीकारः अप्रतिघातस्तथा स्थूले निविशमानस्य परममहत्वाऽऽकाशांतोऽप्र
तिघातः तेन परेण वशीकारेण चित्तं लब्धस्थितिकमिति ज्ञात्वा स्थित्युपायाऽनुष्ठानादुपरमत इत्यर्थः एवं चित्तस्थितेरुपाया उक्ताः ज्ञापकश्च वशीकार उ
क्तः संप्रति लब्धस्थितिकस्य चित्तस्य किं विषयः किंरूपश्च संप्रज्ञातो योगो भवत्यतः तदुत्तरं पठति यथाभिजातस्य कुलीनस्याऽतिस्वच्छस्य स्फटिक
मणेर्जपाकुसुमाद्युपरक्तस्य स्वरूपाऽभिभवेन रक्ताद्याकारता भवति ॥ तथाऽभ्यासवैराग्याभ्यां क्षीणरजस्तमोवृत्तिकस्य चित्तमणेः स्थूला
सूक्ष्मभूतात्मकग्राह्येण ग्रहणेंद्रियैर्गृहीत्रा पूर्वोक्ताऽस्मिताख्यपुरुषेणोपरक्तस्य स्वरूपाऽभिभवेन ग्राह्याद्याकारतापत्तिः स संप्रज्ञातः पूर्वोक्तवि
तर्कविचारानंदाऽस्मिताऽनुगमात् ॥ चतुर्विधश्चतुर्विषयकः प्रत्येतव्यः अत्र सूत्रेऽर्थक्रमबलात्पाठभंगात् ग्राह्यग्रहणगृहीतृष्विति तदुपरक्तस्य चि

तस्य तदंजनता स्वरूपपरित्यागेन तद्रूपता तस्याः समापत्तिरिति व्याख्येयं स्थूलसूक्ष्मक्रमेणैव चित्तस्य गृहीतृपरागात्तस्थेति भिन्नं पदं अविभ
क्तिकं स्यात् तेन कृत्वा क्षीणवृत्तेः तत्स्थस्येति योज्यम् यद्वा तत्स्थं च तदंजनं च तस्य भाव स्तत्ता क्षीणवृत्तेस्तत्तया समापत्तिरित्यर्थः सेयं संप्रज्ञाताख्या स
मापत्तिः पुनरवांतरभेदाच्चतुर्धा भवति सवितर्का निर्वितर्का सविचारा निर्विचारा चेति तत्र सवितर्काया स्वरूपमाह तत्र तासु समापत्तिषु मध्ये सवितर्का समा
पत्तिरेषा ज्ञेया तथाहि गौरित्युक्ते शब्दार्थज्ञानानि त्रीण्यभिन्नानि भासंते तत्र गौरिति शब्द इत्येको विकल्पः अयं हि गौरित्युपात्तयोरर्थज्ञानयोः शब्दाभेदवि
षयकः तथा गौरित्यर्थ इत्येको विकल्पः तत्र गौरित्युपात्तयोः शब्दज्ञानयोरर्थाभेदविषयकः एवं गौरिति ज्ञानमित्येको विकल्पः अयं तु गौरित्युपात्तयोः
शब्दार्थयोर्ज्ञानाभेदगोचरः त एते विकल्पाः असदभेदगोचरत्वात् एवं घटः पट इत्यादयो विकल्पा ज्ञेयाः तत्र शब्दज्ञानाभ्यामभेदेन विकल्पिते स्थूलग
वाद्यर्थे समाहितचित्तस्य योगिनः समाधिजन्यसाक्षात्कारो यथाकल्पितार्थमेव गृह्णाति तथा सा समाधिप्रज्ञा शब्दार्थज्ञानानां विकल्पैः संकीर्णेति

तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का ४२ स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ४३

तुल्या भवति विकल्पत्वाविशेषात् सा संकीर्णा सवितर्का समापत्तिरित्यर्थः निर्वितर्कामाह गवादिशब्दानां शक्तिरूपः संकेतो विकल्पितार्थेषु लोके गृ
ह्यते तेन तस्य स्मृत्या शाब्दज्ञानं परार्थानुमितिश्च विकल्प एव जायते तथा च श्रुते वाऽनुमिते वार्थे श्रुत्यनुमितिरूपविकल्पमूला समापत्तिः सवितर्का भवति स्मृतिपरि
शुद्धौ सत्यां अर्थमात्रतापत्त्यैवताच्चित्तेनार्थमात्राध्यासात् संकेतस्मृतेस्त्यागे सति तत्कार्यस्य विकल्पस्य त्यागात् समाधिप्रज्ञा स्वीयं ग्राहकत्वं प्रज्ञारूपं प्रयत्नेन शू
न्येव भूत्वार्थमात्रनिर्भासा दविकल्पितार्थरूपं यद्ग्राह्यं तत्स्वरूपेणैव निर्भास्यमाना निर्वितर्का समापत्तिरित्यर्थः तत्र सवितर्के साक्षात्कारोपस्तदपरं प्र
त्यक्षं विकल्पत्वात् निर्वितर्कं प्रत्यक्षं तु परं सत्यार्थविषयत्वात् स च सत्यार्थो योगी घटादिरवयवी ज्ञेयः अत्र परमाणुपुंजातिरिक्तोऽवयवी नास्तीति बौद्धमतमा
शंक्य महाने को घट इत्यबाधितानुभवादस्ति स चास्माकं मते भूतसूक्ष्मरूपाणां परमाणूनां परिणामः तस्य च स्वोपादानेन भेदाभेदात्मकं तादात्म्यमिति भा

स्थूलपरिणामघटादिषु उपादानत्वेनाऽनुगता ये परमाणवः पंचतन्मात्राणां विकाराभूतरूपेण संस्थिताः सूक्ष्मास्तेषु विषयेषु स्वीयकार्यकारणदेशकाल
नानाविशेषणविशिष्टेषु स्ववाचकशब्दज्ञानाभ्यां संभेदेन विकल्पितेषु या समापत्तिः सा सविचारेत्युच्यते तेष्वेव सर्वविशेषणशून्येष्वर्थमात्रेषु परमा
णुषु या समापत्तिः सा निर्विचारा सा खलु सत्यार्थमात्रस्वरूपा समाधिप्रज्ञा स्वरूपशून्येव निर्भासते तया च स्थूलगोचरया सवितर्कया च निर्वितर्कया च।
व्याख्यातया सूक्ष्मविषया सविचारा निर्विचारा च व्याख्याता भवतीत्यर्थः ननु किमस्याः ग्राह्य समापत्तेः परमाणुष्वेवाऽवसानं नेत्याह अस्याः समाप
त्तेः सूक्ष्मविषयत्वमलिंगे प्रधाने पर्यवस्यति तथा हि पार्थिवः परमाणुर्गंधतन्मात्रादितरतन्मात्रांशकाज्जायते आप्यस्तु गंधतन्मात्रवर्जिताद्रसत।
न्मात्रादितरतन्मात्रांशकात् तैजसस्तु गंधरसद्वयवर्जिताद्रूपतन्मात्रादितरद्वयांशकात् वायव्यस्तु पूर्वहीनात्स्पर्शतन्मात्राच्छब्दतन्मात्रा
ऽंशकात् नभसः परमाणुस्त्वेकस्मादेव शब्दतन्मात्राज्जायत इति प्रक्रियास्त्र तो विकारेभ्यः परमाणुभ्यः उपादानानि पंचतन्मात्राणि सूक्ष्माणि

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ४४ सूक्ष्मविषयत्वं चाऽलिंगपर्यवसानं ४५ ता एव सबीजः समाधिः ४६॥

तेभ्योऽप्यहंकारः सूक्ष्मः तस्मादपि महान् महतोऽपि प्रधानं तद्धि लयं न ग च्छतीत्यलिंगमुच्यते ततः परं सूक्ष्ममुपादानं नास्ति पुरुष
स्य सत्त्वेऽप्यनुपादानत्वात् पुरुषो हि भोगाऽपवर्गार्थी सन्पुरुषार्थनिमित्तके सर्गे निमित्तमात्रं भवति तस्मात्सूक्ष्मग्राह्यसमापत्तिः प्रधानपर्यंते ति सि
द्धं एवं स्थूले सूक्ष्मे च ग्राह्ये चतस्रः समापत्तय उक्ताः संप्रति तासां संप्रज्ञातत्वमुपसंहरति ग्रहणगृहीत्रोरपि सविकल्पत्वनिर्विकल्पत्वभेदेन सा
नंदा आनंदमात्रा साऽस्मिता अस्मितामात्रेति चतस्रः समापत्तयो भवंति उक्तन्यायसाम्यात् एवमष्टसमापत्तयो यास्ता एव सबीजः समाधिः संप्रज्ञातः वि
वेकख्यात्यभावेन बंधबीजसत्त्वात् सबीजत्वं द्रष्टव्यम् तत्र निर्विचारसमापत्तेः फलतोऽतिशयमाह ॥० ॥० ॥ ॥ ॥०

CC-0. In Public Domain. Digitization by eGangotri

रजस्तमोमलापेतस्य बुद्धिसत्वस्य स्वच्छस्थितिरूपवृत्तिप्रवाहः प्रधानांऽतसूक्ष्मग्राह्यगोचरः यःसोयं निर्विचारसमाधेर्वैशारद्यं तस्मिन्सत्यंऽक्रमेणपरमा
एवादिप्रधानांऽततत्वसमूहालंबनः साक्षात्कारो योगिनः स्वात्मनिष्ठोऽध्यात्मप्रसादो भवतीत्यर्थः अस्य प्रसादस्य योगिसंमतां संज्ञामाह तत्रवैशारद्ये स
ति या प्रज्ञा निर्विचारासमाधिजन्या तस्या ऋतंभरेति संज्ञा भवति ऋतमविकल्पितं सत्यं बिभर्तीति व्युत्पत्तेरित्यर्थः तस्याः श्रुतप्रमाणाभ्यां विषयतो विशे
षमाह गवादिशब्दानां गोत्वादिसामान्ये शक्तिर्न व्यक्तिविशेषेषु तेषामानंत्येनाऽशक्यग्रहत्वात् एवं व्याप्तिरपि वह्नित्वादिसामान्ये गृह्यते अतः श्रुताऽ
नुमानप्रज्ञयोः सामान्यवस्तुविषयः तथाहि लोके शब्दलिंगज्ञानानंतरं गोवह्न्यादिवस्तुमात्रं ज्ञायते न व्यक्तिविशेष इति स्वसाक्षिकमेतत् ऐंद्रि
कप्रत्यक्षं यद्यऽपि गोघटादिविशेषविषयं तथापि सूक्ष्मव्यवहितविप्रकृष्टवस्तुविशेषः समाधिप्रज्ञाया असाधारणो विषयः न च सूक्ष्मादिषु श्रुताऽनु
मानप्रकाशितेषु प्रसरंती समाधिप्रज्ञा कथं स्वमूलश्रुताऽनुमानागोचरविशेषगोचरा स्यादिति वाच्यं बुद्धेः स्वतः सर्वग्रहणशक्तत्वात् बुद्धिस

निर्विचारवैशारद्येऽध्यात्मप्रसादः ४७ ऋतंभरा तत्र प्रज्ञा ४८ श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ४९ तज्ज
संस्कारोऽन्यसंस्कारप्रतिबंधी ५०

त्वं हि प्रकाशस्वभावं सर्वार्थग्रहणसमर्थमपि तमसावृत्तं सन्मानमपेक्ष्याल्पविषयं भवति यदा तु समा
धिना विगततमःपटलं सर्वतःप्रकाशमानमतिक्रांतमानमर्यादं भवति तदा प्रकाशानंत्यात् किं नामागोचरं स्यात् तस्मात् समाधिप्रज्ञा विशेषा
ऽर्थगोचरत्वात् मानांतरविषयादन्यविषयेत्यर्थः तदुक्तं प्रज्ञाप्रसादमारुह्य अशोच्यः शोचतो जनान् भूमिष्ठानिव शैलस्थः सर्वानप्राज्ञोनुपश्य
तीति जनान् समाधिशून्यानमानभूम्यानित्यर्थः ननु अनादिनाशब्दादिविषयभोगसंस्कारेणाऽतिबलीयसाऽभिहता समाधिप्रज्ञा न स्थितिं लभते इ ८
त्यत आह निर्विचारसमाधिप्रज्ञाजन्यः संस्कारो व्युत्थानसंस्कारस्य प्रतिबंधी बाधक इत्यर्थः अनादिरपि व्युत्थानसंस्कारस्तत्वास्पर्शित्वात् तत्स्प
र्शिप्रज्ञासंस्कारेण बाध्यते तद्बाधे व्युत्थानप्रत्ययान भवंति समाधिप्रज्ञा तु भवति ततः संस्कारः पुनः पुनरिति समाधिसंस्कारोपचयात् सर्वात्मना क्लेशक्ष।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

येसतिभोगान्निर्विसाचित्तंपुरुषाऽभिमुखंविवेकख्यातिंकृत्वाकृतकार्यंलीनंभवतिसमाप्ताधिकारत्वात।ख्यातिपर्यवसानंहिचित्तचेष्टितमितिन
नुसंप्रज्ञातसमाधिप्रज्ञासंस्कारप्रचुरंचित्तंतत्प्रज्ञापरंपरामेवकुर्वत्कथंनिर्वीजसमाधिंकुर्यादित्यतआह पुरुषख्यात्यऽनंतरंपरवैराग्यसंस्कारप्रव
येनतस्यसंप्रज्ञातसमाधिप्रज्ञासंस्कारस्यअपिशब्दात्प्रज्ञायाश्चनिरोधेसतिसर्वस्यप्रज्ञातज्जसंस्कारप्रवाहस्यनिरोधाऽदवसिताधिकारत्वेनचित्त।
स्यकृत्याऽभावात निमित्तापायेनैमित्तिकापायइतिन्यायेननिर्वीजःसमाधिर्भवतितदुक्तंआगमेनाऽनुमानेनध्यानाऽभ्यासरसेनच त्रिधाप्रकल्पयन्
प्रज्ञांलभतेयोगमुत्तममिति अवणेनमननेनपुरुषमात्रध्यानाऽभ्यासोधर्ममेघाऽख्यः तद्रसेनपरवैराग्येणप्रज्ञाप्रसादात्मनापुरुषंसाक्षात्कुर्वन्नि
र्वीजयोगंलभतइत्यर्थः कालक्रमेणनिर्वीजनिरोधसंस्कारप्रचयेसतिस्वप्रकृतौचित्तंलीयतेहेत्वऽभावात्कृत्यशेषलक्षणाऽधिकारोहिचित्तस्य
स्थितिहेतुःनहिकृतभोगविवेकख्यातिनश्चित्तस्यकृत्यशेषोऽस्तितस्माच्चित्तस्यप्रलयेपुरुषःस्वरूपमात्रप्रतिष्ठःकेवलोमुक्तइतिसिद्धं॥ पूर्वस्मि

तस्याऽपिनिरोधेसर्वनिरोधान्निर्वीजःसमाधिः५१ इतिसमाधिपादः॥ तपःस्वाऽध्यायेश्वरप्रणिधानानिक्रियायोगः१ समाधिभा
वनाऽर्थःक्लेशतनूकरणाऽर्थश्च२॥ न्यादेयोगमुद्दिश्यलक्षणमुक्त्वावृत्तीर्निरूप्यतन्निरोधोपायाऽभ्यासवैराग्येप्रतिपाद्यचित्तस्थित्युपायानुक्त्वा

श्चिदुक्ताद्विविधोयोगःसावांतरभेदःप्रतिपादितःतत्राऽभ्यासवैराग्येचित्तशुद्धिसाध्येइतिमत्वातस्यशुद्धिहेतुमादौक्रियायोगमाह पूर्वपादोक्तस्ययोग
स्याऽस्मिन्पादेसाधनान्युच्यंतइत्यऽनयोःपादयोःसंगतिःब्रह्मचर्यगुरुसेवासत्यवाचनकाष्ठमौनाऽकारमौनस्वाऽश्रमधर्मद्वन्द्वसहनमिताऽशनादिकं
तपःनकायशोषःधातुवैषम्येयोगविघातात्स्वाऽध्यायःप्रणवश्रीरुद्रपुरुषसूक्तादीनांपवित्राणांजपोमोक्षशास्त्राध्ययनंचफलाऽभिसंधिंविनाकृ
तानांकर्मणांपरमगुरावीश्वरेसमर्पणमीश्वरप्रणिधानंतानिक्रियारूपोयोगोयोगसाधनत्वादित्यऽर्थः क्रियायोगस्यफलमाह निविडेषुक्लेशे
षुसत्सुसमाधिर्नसिध्यतित स्मात्क्रियायोगःक्लेशानन्तनूकृत्यसमाधिंभावयतितनूकरणंक्लेशानांसदोद्भवताकादाचित्कउद्भवःभावनंसमाधे

रुत्पादनं तदर्थः फलं यस्य स तथोक्तः क्रियायोगेन क्लेशच्छिद्रेषु लब्धावसरः समाधिः विवेकख्यातिमुत्पाद्य सवासनक्लेशान्हन्तीति भावः अथ क्लेशाः की
दृशाः किंयन्तो वेत्यत आह क्लिश्यन्ति कर्मतत्फलप्रवर्तकाः सन्तः पुरुषं दुःखाकुर्वन्तीति क्लेशाः ते च पंचेत्यर्थः तत्र चतुर्णामविद्याकार्यत्वेनाविद्या
त्मत्वमाह उत्तरेषामस्मितादीनामविद्या क्षेत्रं प्रसवभूमिः तेषामवान्तरभेदमाह प्रसुप्तेति प्रसुप्ताः तनवो विच्छिन्ना उदाराश्च तेषां तत्र विदेहप्रकृति
लयानां योगिनां क्लेशाः प्रसुप्ताः विवेकख्यात्यभावेनादग्धतया शक्तिरूपेणावस्थानात् अत एवां ते पुनरुद्भवन्ति क्रियायोगिनां तनवः विषयसंगिनां
विच्छिन्ना उदाराश्च भवन्ति यथा चैत्रस्य यस्यां रागस्तत्र क्रोधो विच्छिन्नो रागः उदारः एवं यत्र क्रोध उदारस्तत्र रागो विच्छिन्नः कालेनोदारो भूत्वा पुरुष
पशुं क्लेशयति एते क्लेशा अविद्यामूलाः तस्याः पुरुषापरोक्षख्यात्या निवृत्तौ निवर्तन्ते यथा जीवन्मुक्तस्य क्लेशाः क्षीणा इति पंचमी क्लेशानामवस्था द्र
ष्टव्याः तेष्वविद्यारूपमाह अतस्मिंस्तद्बुद्धिरित्यर्थः अमरा देवा इत्यनित्येषु नित्यत्वभ्रान्त्या देवत्वार्थं कर्मकृत्वा बध्यन्ते एवमस्तु चौ स्त्रीकायेष्वशुचित्वभ्रां

अविद्याऽस्मितारागद्वेषाभिनिवेशाः पंच क्लेशाः ३। अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणां ४ अनित्याशुचिदुःखा
नात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ५॥ दृग्दर्शनशक्त्योरेकात्मतेवास्मिता ६॥

त्या बध्यन्ते न तु तदुक्तं भगवता वेदव्यासेन स्थानाद्बीजा
दुपष्टंभान्निष्यंदान्निधनादपि कायमाधेयशौचत्वात्पण्डिता ह्यशुचिं विदुरिति विण्मूत्रसंकुलं मातुरुदरं स्थानं शुक्रशोणितं बीजं अन्नपरिणामश्ले
ष्मादिरुपष्टंभः सर्वद्वारैर्मलानां स्रवणं निष्यंदः निधनं मरणं तेन हि श्रोत्रियकायोप्यत्यन्ताशुचिर्भवति आधेयशौचत्वं स्नानानुलेपनादिना अशुचित्वा
पादनं तथा परिणामदुःखे भोगे सुखत्वभ्रान्तिरनात्मनि बुद्ध्यादावात्मख्यातिः अविद्या न त्वविद्या विरोधिनीत्यर्थः यद्यपि शुक्तिरूप्याद्यविद्याः
सन्ति तथापीयं चतुर्विधैवाविद्या बन्धमूलमिति भावः दृग्शक्तिः पुरुषः दृश्यत इति दर्शनं तच्छक्तिः बुद्धिः शक्तिशब्दो योग्यतार्थकः भोक्तृभोग्यत्वयो ९
ग्ययोरत्यन्तविविक्तयोर्दृग्दृश्ययोरविद्याकृतैकात्मता तादात्म्यं इवशब्देनाहमस्मीति भ्रान्तिकृतत्वं तादात्म्यस्य द्योतयति साऽस्मितेत्यर्थः अयं हृदय

यंथिरित्युच्यते ब्रह्मवादिभिः अस्मितायाः कार्यं रागं निरूपयति सुखानुभवे सति स्मृत्या तज्जातीयसुखान्तरे तत्साधने वा यात्तृष्णा स रागः सुखमनुशेते विषयी
करोतीति सुखानुशयीत्यर्थः दुःखानुभवितुः स्मृत्या दुःखतत्साधनयोर्यः क्रोधः स द्वेष इत्यर्थः विदुषो मूर्खस्य वा जंतुमात्रस्य यो मरणत्रासः सोऽभिनिवे
शः यथा मूर्खस्याहं सदा भूयासमिति रूढश्चासः तथा विदुषोऽपि रूढो दृश्यते यतः स्वरसवाही सः पूर्वजन्मस्वासकृन्मरणाद्दुःखानुभवजन्यवासनासंघ
स्वरसः तेन वहति प्रवहतीति स्वरसवाही अनेन भयेन देहातिरिक्तात्मा भाष्ये प्रसंगाद्दर्शितः दृश्यते हि जातमात्रस्य बालस्य मरणाद्भयं तच्च पूर्वमरणस्मर
णं विनाऽनुपपन्नमिति एते चाऽविद्यादयः पंच क्रमेण तमो मोहो महामोहस्तामिस्रोऽन्धतामिस्र इत्युच्यंते तत्राऽव्यक्तमहदहंकारपंचतन्मात्रेष्वष्टस्वऽ
नात्मस्वात्मबुद्धिरविद्यातमः अणिमाद्यष्टैश्वर्येष्वणुरस्मि महानस्मीति तादात्म्यं मोहः तेन दिव्यादिव्यभेदेन शब्दादिदशविषयेषु रागो महामो
हः कुतश्चिद्दैश्वर्यविघाते तन्निमित्तकदशविषयभोगाऽलाभे सत्यष्टादशोष्टविघातके द्वेषस्तामिस्रः एतेषामेवाऽष्टादशानामिष्टानां नाशाद्भयमंऽधता

सुखानुशयी रागः ७ दुःखानुशयी द्वेषः ८ स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः ९ ते प्रतिप्रसवहेयाः सूक्ष्माः १० ध्यानहे
यास्तद्वृत्तयः ११॥ मिस्र इति तथा च सांख्यकारिका भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः तामिस्रोऽष्टादशधा तथा भवत्यंऽधतामिस्र
इति ते च पंच क्लेशा द्विविधाः पुरुषख्यात्याऽदग्धाः संस्काररूपाः सूक्ष्माः क्रियायोगेन मैत्र्यादिभावनरूपपरिकर्मणा च तनूकृताः स्थूला इति तत्र सू
क्ष्माणां हानोपायमाह चित्तस्य कृतकृत्यस्याऽस्मितायाः स्वप्रकृतौ प्रलयः प्रतिप्रसवस्तेन हेयाः सूक्ष्मास्ते क्लेशाः धर्मिनाशादेव तद्धर्माणां संस्काराणां
नाश इत्यर्थः स्थूलानां हानोपायमाह यः क्रियायोगेन विरलाः क्लेशवृत्तयः स्थूलाः सुखदुःखमोहात्मिकाः ताः पुरुषध्यानेनैव हातव्या इत्यर्थः
यथा लोके वस्त्रस्याऽतिस्थूलो मलः प्रक्षालनेनैवादौ शोध्यते पश्चाद्विरलः क्षारसंयोगादिना मलवासना तु वस्त्रनाशेनैव नश्यतीति तथा क्रियायोगेना
ति निविडाः क्लेशा विरलीभवंति विरलास्तु ध्यानेन तनूकृताः सूक्ष्मास्तु चित्तनाशेन नश्यंतीति भावः क्लेशान्निरूप्य नतु कथं तेषां क्लेशत्वमित्या

CC-0. In Public Domain. Digitization by eGangotri

अत्रत्रिभिःपदैःक्रमेणकर्मणोहेतुस्वरूपकार्य्याण्युच्यंते आशेरते संसारिकाःपुरुषाअस्मिन्नित्याशयःकर्मणांधर्माधर्मरूपःसंस्कारःक्लेशाःकामक्रोधाद
योमूलमस्येतिक्लेशमूलःसचद्विविधःदृष्टजन्मवेदनीयोऽदृष्टजन्मवेदनीयश्चेतियेनदेहेनकर्मकृतंतेनतत्रदृष्टंजन्मतेनैवदेहेनभोक्तव्यआद्यःयथान
न्दीश्वरोबालएवमनुष्यदेहेनतीव्रसंवेगेनमंत्रतपःसमाधिभिःईश्वराऽराधनंकृत्वासद्यएवदेवत्वजातिंदीर्घमायुःदिव्यभोगंचलब्धवान् तथाविश्वामि
त्रोजात्याऽयुषीलब्धवान्तथाभीतव्याधितकृपणविश्वस्त महाऽनुभावेषुकृतोपराधःसद्यएवपच्यतेयथानहुषस्यमहर्ष्यऽपराधेनसद्यःसर्पत्वमभवत्
द्वितीयस्तुजन्मांऽतरभोग्यस्वर्गनरकादिहेतुःकर्माशयइत्यर्थः अयंक्षीणक्लेशानांनास्तीतिविशेषमाह क्लेशरूपेमूलेसत्येवकर्मणोविपाकःफलंभवति
नत्वऽक्लेशोभुंक्तेनत्वऽकामस्यक्वचिदऽपिकर्मजेफलेसुखवृद्धिरऽस्तिनत्वऽनुद्वेगःशोचतिअतोविवेकख्यात्यऽग्निदग्धेषुक्लेशेषुकर्मबीजंवितुषव्रीह्या
दिवन्नफलंप्रसूते सविपाकस्त्रिविधःजातिर्जन्मदेवत्वादिर्दीर्घायुश्चिरकालंदेहप्राणयोर्योगःइंद्रियैर्विषयाऽनुभवोभोगइतितत्रभोगोसुखःजात्या

क्लेशमूलःकर्माशयोदृष्टाऽदृष्टजन्मवेदनीयः१२ सतिमूलेतद्विपाकोजात्याऽयुर्भोगाः१३ तेह्लादपरितापफलाःपुण्याऽपु
ण्यहेतुत्वात् १४ परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्चदुःखमेवसर्वंविवेकिनः१५॥ ऽयुषीतच्छेषइतिविभागःतत्रैकस्मि
न्देहेविचित्रभोगदर्शनादऽनेकानिकर्माणिमरणकालाऽभिव्यक्तानिएवंजन्मारभंतइत्येकभविकःकर्माशयउच्यतेतस्यक्वचिज्जातिःक्वचिदाऽ
युःक्वचिद्भोगःक्वचिद्द्वयंक्वचित्त्रयमितिफलवैचित्र्यंज्ञेयंतदुक्तंभगवतागहनाकर्मणोगतिरितिविस्तरस्तुभाष्येद्रष्टव्यः अधुनाजात्यादीनांहेयत्वार्थंफ १०
लमाह तेजन्माऽयुर्भोगाःपुण्यहेतुकाःसुखफलाःअपुण्यंपापंतद्धेतुकाःदुःखफलाःअत्रभोगोविषयाऽनुभवः मिश्रास्तुसुखदुःखाऽनुभवोभोगः
नस्यकर्मतयासाध्यत्वेनसुखदुःखफलेगमनस्यैवयामइत्याहुः ननुतेदुःखफलाःहेयाःभवंतुसुखफलास्तुकथंहेयाइत्यऽतआह परिणामोऽन्यथाऽ
भावःतापोवर्त्तमानःसंस्काराऽभूतःएतान्येवदुःखानितैरितिविग्रहः तथाहिविषयसुखभोगात्कामाऽनलोवर्द्धतेह्नोसत्यांकाम्यालाभेदुःखऽमवश्यंभाविलाभे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽपिकुतश्चिद्भोगसंकोचेदुःखंसंकोचकेद्वेषः ततः कामद्वेषाभ्यांपापोपचयात्तद्दुःखंअसंकोचेव्याधिः पापंचततोदुःखमेवंभोगस्यपरिणामदुःखता
तथासुखभोगकालेविषयनाशभीत्यादुःखंवर्त्ततेनाशकेद्वेषाच्चतापोऽस्तीतितापदुःखताभोगस्यतथासुखभोगनाशेसंस्कारोभवतितेनस्मृत्यारा
गेसतिपुण्यापुण्योपचयात्सुखदुःखभोगःपुनःसंस्कारइत्यनंतादुःखसंततिःयदिभोगनाशेसंस्कारोनस्यात्तदानदुःखसंततिःभवत्येवतुसंस्का
रइतिसंस्कारदुःखताइमानिदुःखानिविवेकिनोऽक्षिपात्रकल्पस्ययोगिनउद्वेजकानिनतुकाठिन्यचित्तानांकर्मिणांयथाऽक्षिपात्रंमृदुकल्पंऊर्णा
तंतुरपिउद्वेजयतिनान्यमवयवंतस्माद्विवेकिनःसर्वमेवभोगसाधनंविषमिश्रान्नवद्दुःखमेवपरिणामतापसंस्कारदुःखैर्योगाद्गुणवृत्तिविरो
धाच्चगुणाश्चित्तात्मनापरिणतानिसत्वरजस्तमांसितेषांवृत्तयःसुखदुःखमोहास्तासांविरोधःपरस्परमभिभाव्याभिभावकत्वंतस्मादित्यर्थःचलंहि
गुणवृत्तंतच्चचित्तेयागुणवृत्तिराविर्भवतिधर्मोद्भवात्साऽपुनरधर्मोद्भवाद्धर्माभिभवेसतितिरोभवतिदुःखत्वंस्वाभाविकंस्वस्याःस्फुटयतिस्वभावतोदुःखरूपे
वसुखवृत्तिःदुःखात्मकरजोमिश्रसत्वपरिणा हेयंदुःखमनागतं १६ द्रष्टृदृश्ययोःसंयोगोहेयहेतुः १७॥ मत्वात्किंतुस्वकालेसत्वप्राधान्यात्त
स्याःदुःखत्वमस्फुटंरजसासत्वतिरोभावेसतिस्फुटमितिसुखदुःखयोर्भेदव्यपदेशःएतेनसुखस्यमोहत्वंव्याख्यातंअतोगुणपरिणामात्मकंसर्वमेव
जगत्दुःखमोहात्मकंहेयमितिसिद्धंतत्रयथाचिकित्साशास्त्रेरोगारोगहेतुरारोग्यंतद्धेतुरितिचतुष्टयंउत्पाद्यंतथाऽस्मिन्नपिशास्त्रेहेयंहेयहेतु
र्मोक्षस्तद्धेतुरितिचतुष्टयंसुत्पादयितुंविशिष्यहेयंदर्शयति अतीतस्यदुःखस्यभोगेनगतत्वाद्वर्त्तमानदुःखस्यभोगेनैवक्षयादनागतमेवदुःख
हेयमित्यर्थःहेयहेतुमाहद्रष्टाचिद्रूपःपुरुषोबुद्धिस्थस्वच्छायात्मकदर्शनवानदृश्यंबुद्धिसत्वंतयोःसंयोगःस्वस्वामिभावःबुद्धिसत्वंहिविविध
शब्दाद्याकारेणइंद्रियादिद्वारापरिणतंचिच्छायापत्त्यापुरुषाऽभेदेनदृश्यमानंसन्निधिमात्रेणाऽयस्कांतमणिवदुपकारकंस्वनिष्ठभोगापवर्गौपुरु २
षेदर्शयत्स्वंभवतिपुरुषस्यस्वामिनःसोयमभेदभ्रांतिरूपाऽविद्याकृतःपुरुषार्थाधीनस्थितिकःसंयोगोहेयस्यदुःखस्यहेतुरित्यर्थःदृश्यंप्रपंचयति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रकाशशीलं सत्त्वं क्रियाशीलं रजः स्थितिः प्रकाशक्रिययोः प्रतिबंधः तच्छीलं तमः तत्र सत्त्वं मृदुत्वात्तप्यं तापकं रजः एवं सत्त्वरजसोस्तप्यतापकभावे स
ति तमसा मोहो भवति पुरुषस्य ममता पद्गतिनदिदं गुणत्रयं स्वस्वकार्ये मिथः सहायमविवेकि भोग्यं विवेकित्याज्यं परस्पराऽभिभावकं परस्पराऽंगांगि
भावं सुखप्रकाशलाघवद्दुःखक्रियोपष्टंभकमोहाऽवरणगौरवकार्यलक्षणज्ञेयभेदं स्वतः परस्पराऽविभागानुद्भूतज्ञानभेदं प्रधानशब्दवाच्यं भूतेंद्रियात्म
कं भूतानि स्थूलानि तन्मात्राणि चेंद्रियाणि ज्ञानकर्मेंद्रियाणि दश बुद्ध्यहंकारमनांसि त्रीण्यंतःकरणान्यात्मा स्वाभिन्नः परिणामोऽस्य तद्भोगाऽपवर्गा
ऽर्थं भोगमोक्षप्रयोजकं दृश्यमित्यर्थः एतेषां गुणानां परिणामं विभज्य दर्शयति· विशिष्यंत इति विशेषाः व्यावृत्ताः षोडश विकाराः खंवायुतेजोवऽवन
यः स्थूलभूतानि पंच ज्ञानकर्मेंद्रियाणि दश मनश्चेत्येते षोडश विकाराः एवं न तत्त्वांतरप्रकृतयः एतेषां विकाराणां प्रकृतयो बुद्धेर्विकृतयः षड्ऽविशेषाः
पंचतन्मात्राऽहंकारः अहंकारात्पंचतन्मात्राणीति सांख्याः अहंकारस्याऽनुजानि बुद्धेरपत्यानि तन्मात्राणीति योगाः तत्र पंचतन्मात्राणि शब्द

प्रकाशक्रियास्थितिशीलं भूतेंद्रियात्मकं भोगाऽपवर्गार्थं दृश्यं १८ विशेषाऽविशेषलिंगमात्राऽलिंगानि गुणपर्वाणि १९
द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययाऽनुपश्यः २०॥

स्पर्शरूपरसगंधाऽख्यानि स्थूलभूतानां प्रकृतयः अहंकारः सत्त्वेन रजसा उभयेन ज्ञानकर्मेंद्रि
यमनसां प्रकृतिः लयं गच्छतीति लिंगं तन्मात्रं महत्तत्त्वमात्रं चाविशेषाः विशेषाभ्यां वैलक्षण्यं चान्यत्तेन तद्विनिर्विकल्पकाऽध्यवसायात्मकं प्रधानस्या
ऽप्यकार्ये अलिंगं गुणानां साम्याऽवस्थारूपं प्रधानं एतानि चत्वारि गुणानां पर्वाणि परिणामाः गुणत्वं चेतनं प्रति शेषत्वं मंतव्यं एवं दृश्यं निरूप्य ११
द्रष्टारं निरूपयति॥ द्रष्टा पुरुषो दृशिमात्रश्चिन्मात्रो न ज्ञानादिधर्मकः अतः शुद्धोऽपरिणाम्यऽपि प्रत्ययं बुद्धिवृत्तिमनुसृत्य पश्यतीति प्रत्ययाऽनुपश्यः
स्वस्य बुद्ध्याऽविवेकाद्वृत्तिभिरेकीभूतः शब्दादीन्पश्यतीत्यर्थः तदुक्तं वृत्तिसारूप्यमितरत्रेति एवं दृश्यद्रष्टाराबुक्तौ तयोः शेषशेषित्वमाह॥ ॥ २० ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दृश्यस्यभोग्यरूपस्यस्वरूपंद्रष्टुरर्थमेवनस्वाऽर्थंअचेतनत्वादित्यर्थः ननुतर्हिद्रष्टुः प्रयोजनेनिष्पन्नेसतिकृत्याऽभावाद्दृश्यंप्रधानंनिर्व्यापारंस्यात्तथाचा
ऽधुनासंसारोनोपलभ्येतेत्यऽतआह प्रधानमेकंपुरुषाअनंताइतिस्थितिः अजामेकामितिश्रुतेः तत्रप्रधानंयंपुरुषंप्रतिभोगाऽपवर्गौकृतवत्स।
कृताऽर्थः स्वामित्वात्यथाभृत्येनकृतजयेनस्वामिकृतजयइत्युच्यतेतद्वत्कृताऽर्थंमुक्तपुरुषंप्रतिनष्टमऽदर्शनंगतमऽपितद्दृश्यमऽनष्टंपुरुषांऽन्त
रसाधारणत्वात् एतदुक्तंभवतिपुरुषाऽर्थोऽत्यऽनागताऽवस्थः प्रधानस्यप्रवृत्तिहेतुः तत्रकृताऽर्थंप्रतिप्रवर्तकाऽभावात्प्रधानस्याऽप्रवृत्तावऽपिअकृताऽर्थं
प्रतिमहदाद्याकारेणप्रवृत्तिर्घटतेतथाचैकस्यमुक्तौसर्वेषांमुक्तिप्रसंगोनास्तीति एवंदृश्यद्रष्टारौव्याख्यायहेयहेतुंसंयोगंनिरूपयति॥ स्वंदृश्यंतस्य
शक्तिर्जडत्वेनदृश्यत्वयोग्यतास्वामीतुपुरुषस्तस्यशक्तिश्चेतनत्वेनद्रष्टृत्वयोग्यतास्वरूपान्मिकेवतयोः स्वस्वामिस्वरूपयोः शक्त्योः विविधशा।
ऽद्याकारदृश्यबुद्धिस्वरूपस्योपलब्धिर्भोगः स्वामिस्वरूपस्योपलब्धिरऽपवर्गः तद्धेतुः संयोगः स्वस्वामिभावाऽख्यः सएवद्रष्टृदृश्यभावीभोक्तृ

तदर्थएवदृश्यस्यात्मा २१ कृताऽर्थंप्रतिनष्टमऽप्यनऽष्टंतदऽन्यसाधारणत्वात् २२ स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयो
गः १३ तस्यहेतुरविद्या १४ तदऽभावात्संयोगाऽभावोहानंतद्दृशेः कैवल्य १५॥ भोग्यभावइत्याऽख्यायतेयस्याऽभावेदृग्दृश्ययोः स्वरूपो

पलब्धिर्नभवतियद्भावेसाभवतिससंयोगः कार्येणोन्नेयइत्युपदिष्टंभवतिएवंसंयोगस्यस्वरूपंकार्यंचोक्त्वाकारणमाह॥ भ्रान्तिज्ञानवासनासंयोग
स्यकारणमित्यर्थः अहमितिदृग्दृश्ययोरऽभेदप्रत्ययोभ्रान्तिः तद्वासनावासितंचित्तंप्रलयेलीनंप्रधानभावमुपगतंसर्गकालेपुरुषंप्रतिसत्त्वेनैव
जायतेतेनसंयोगेनाऽविवेकिनोबंधोविवेकिनोमोक्षश्चभवतिएतयात्वऽनादिवासनाविचित्रयाचित्तवर्तिन्याऽविद्ययासमंततोमत्स्यजालमिवाऽनुवि
द्धंपुरुषपशुंस्वकर्मोपहितंदुःखमुपात्तंत्यजंतंत्यक्तमुपाददानंहातव्येएवाऽनात्मन्यऽहंकारममकारैर्वाऽनुपातिनंजातंजातंवाह्याऽध्यात्मिकोभयनि
मित्तास्त्रिपर्वाणस्तापाअनुप्लवंतेएवंहेयंतद्धेतुंचोपपाद्यहेयस्यहानेमोक्षमुत्पादयति॥ तस्याअविद्यायाः अभावाद्विद्यमानाशक्तत्कार्यस्यबुद्धिपुरुषसं

यो॰ टी॰ म॰ १२

दुःखस्यहेयस्यहेतोःऽभावोविनाशोहानंयत्तद्देवदृशेःनित्यमुक्तस्यकैवल्यमित्यर्थःमोक्षस्तूक्तातद्धेतुमाह॥ दृग्दृश्ययोर्भेदोविवेकस्तस्यज्ञानंख्यातिःवि
प्लवोमिथ्याज्ञानंआदौस्वःऽऽत्यागमात्रमान्यतोविवेकख्यातिरुदेतिसाऽन्नाद्यः विद्यांहंतिपरोक्षत्वात्तदपदासामननेस्थापितासतीसर्वतोविरक्तेनपुरु
षाऽभिमुखेनचित्तेननिरंतरमभ्यस्यतेतदाध्यानप्रकर्षपर्यंतजाचित्प्रतिविंववतीसाक्षात्काररूपासवासनमिथ्याज्ञानंनिहंत्यऽविप्लवासतीपरवैराग्य
पूर्वकनिरोधेनसंस्कारशेषस्यकृतकृत्यस्यप्रारब्धाऽवसानेऽत्यंतिकनिवृत्तिद्वाराभाविदुःखहानस्यमोक्षस्योपायइत्यर्थः स्थिरविवेकख्यातेर्जीवन्मु
क्तस्यज्ञानंवैभवमाह प्रकृष्टोंतोऽवसानंफललेनयासांताः प्रांताश्चरमाइतियावत प्रांताभूमयोऽवस्थायस्याः साप्रज्ञाप्रांतभूमिः स्थिराऽविप्लवात्मख्याते
र्विदुषः प्रत्ययांतरतिरस्कारेण सप्तप्रकाराः प्रज्ञाऽवस्थाश्चरमाभवंति ज्ञातव्यमऽखिलंज्ञातमतः परंनकिंचिज्ज्ञातव्यमस्तीत्येकासर्वजिज्ञासानिव
र्तकत्वादियंप्रांतानहीयमनात्मज्ञस्यसंभवतितत्तदाऽवलंवनसमाधिनाप्रधानाऽतप्रज्ञायांस्थिरायामऽपिऽत्र्यात्मजिज्ञासायाः सत्वेनतत्प्रज्ञायाअ

विवेकख्यातिरऽविप्लवाहानोपायः १६ तस्यसप्तधाप्रांतभूमिः प्रज्ञा १७ योगांगानुष्ठानाऽदशुद्धिक्षयेज्ञानदीप्तिराविवेकख्यातेः १८

चरमत्वात एवमऽग्रिमावस्थानांप्रांतत्वंमंतव्यंहातव्यासर्वेवंधहेतवोहताः नकिंचिन्ममहेयमऽस्तीतिद्वितीयाकैवल्यप्राप्त्याप्राप्तव्यमऽखिलंप्राप्तंअतो
ऽन्यत्नाकिंचिदऽपिममप्राप्तव्यमऽस्तीतितृतीयाविवेकख्यातिसंपादनेनकर्त्तव्यमऽखिलंकृतंनकिंचित्कार्यमऽस्तीतिचतुर्थीएताश्चतस्रः कार्यविमुक्ति
संज्ञाः चित्तविमुक्तिसंज्ञाः तिस्रः यथाकृतार्थमेवुद्धिसत्वमित्येकाबुध्यादिरूपागुणाश्चपिगिरिशिखरच्युताइवग्रावाणोनिरऽवस्थानाः स्वकारणेप्रल
याऽभिमुखाः संपात्तेनास्तमाऽत्यंतिकंगछंतितेषांनास्तिपुनः प्ररोहः प्रयोजनाऽभावादितिद्वितीयातथागुणाऽतीतः स्वरूपमात्राऽवस्थितश्चिद्रेकर
सइतितृतीयाप्रज्ञाऽवस्थेत्यर्थः जिज्ञासाजिहासाप्रेप्साचिकीर्षाशोकभयविकल्पांतफलाः सप्तप्रज्ञाभूमयः प्रांतामंतव्याइत्यर्थः संप्रतिप्रज्ञासाध
नान्याह॥ योगांगानांयोगस्यचाऽनुष्ठानादऽशुद्धेः क्लेशकर्मरूपायाः क्रमेणक्षयेजायमानेज्ञानस्यदीप्तिर्विशुद्धिः आनिर्विकल्पंविवेकख्यातेर्भवतीत्यर्थःसां

योगाऽनुष्ठानशुद्धिद्वाराप्रज्ञासाधनमितिभावः का
नियोगांगानीत्यऽतआह॥ १८

तत्र के यमा इत्यत आह ॥ अन्यानपेक्षत्वेन सफलत्वान्यमा आदावुच्यंते पश्चाद्यमसापेक्षा नियमाः एतदुभयाधीनस्तु द्व्यपेक्षा आसनादय उत्तरोत्तरहेतवः पश्चादुच्यंते तत्राहिंसा नाम मनोवाक्कायैः सर्वदा सर्वभूतानामपीडनपरः सूत्र एष धर्मः अन्ये यमादयः एतस्या एव सुध्यर्थाः तथा चोक्तं स खल्वयं ब्राह्मणो यथा यथा व्रतानि बहूनि समादित्सति तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्तमानस्तामेवावदातरूपामहिंसां करोतीति सत्यं परहितार्थं यथार्थकथनं बलाद्रहसि वा परवित्तहरणं स्तेयं तदभावोऽस्तेयं परद्रव्यास्पृहेत्यर्थः ब्रह्मचर्यं उपस्थसंयमः स्त्रियाः प्रेक्षणालापस्पर्शश्रवणध्यानत्यागः तदंगं अपरिग्रहो नाम देहयात्रातिरिक्तभोगसाधनास्वीकारः एते पंच यमाः योगस्य विरोधिहिंसानृतस्तेयस्त्रीसंगपरिग्रहनिरासकत्वेनांगत्वं भजंते एतेषां योगिभिरुपादेयविशेषमाह ॥ जातिर्गोत्वब्राह्मणत्वादिः देशस्तीर्थादिः कालो नियतश्चतुर्दश्यादिः अनियतो ब्राह्मणभोजनाद्यवसरः समयः तत्र सदा गां ब्राह्मणं न हनिष्यामीत्यहिंसा जात्यापरिच्छिन्ना कमपि तीर्थे वा चतुर्दश्यां वा न हनिष्यामीति देशकालाभ्या

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावंगानि २९ अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः
३१ जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतं ३१ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ३२ ॥

मनवच्छिन्ना दैवब्राह्मणाद्यर्थभोजनादिसमयातिरेकेण न हनिष्यामीति समयावच्छिन्ना प्राणिमात्रं क्वचिदपि कदाचिदपि कस्यापि कृतेऽहं न हनिष्यामीति जात्यादिभिश्चतुर्भिरनवच्छिन्ना भवत्यहिंसा पुष्कला एवं सत्यादयोपि अनवच्छिन्ना ऊहनीयाः एवं सर्वासु जात्यादिषु भूमिषु कृतप्राप्यवस्थासु विदिताः सार्वभौमा महाव्रतमित्युच्यंते इत्यर्थः नियमानाह ॥ शौचं मृत्जलादिकृतं गोमूत्रयावकादिमेध्याहारकृतं च बाह्यं आंतरं मैत्र्यादिभावनया चित्तस्यासूयादिमलराहित्यं संतोषः सन्निहितप्राणधारणमात्रहेतुना तुष्टिः तपो द्वन्द्वसहनं यथायोगं कृच्छ्रादिकं च स्वाध्यायः प्रणवाद्यभ्यासः ज्ञानतोऽज्ञानतो वापि यत्करोमि शुभाशुभं तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहं कर्मणा मनसा वाचा या चेष्टा मम नित्यशः केशवाराधने सास्याज्ज

CC-0. In Public Domain. Digitization by eGangotri

यो॰ टी॰ न्मजन्मांतरेष्वपि इति परमगुरौ सर्वपुण्यकर्मार्पणमीश्वरप्रणिधानमित्यर्थः एतेषां यमनियमानां वितर्कैर्हिंसादिसंकल्पैर्हेनिष्प्राप्येनःमयकारि
म॰ णामःनृतं वक्ष्यामि परस्वमादास्य इत्यादिभिर्बाधने प्राप्ते सति यमादिपरो ब्राह्मणः प्रतिपक्षभावनं कुर्यात् घोरेषु संसारांगारेषु पच्यमानेन मया
१३ शरणमुपगताः सर्वभूताः भयप्रदानेन यमादिधर्माः स्वल्वाःहत्य क्ताःहिंसादीन् पुनस्तानाःददानस्तुल्यः श्ववृत्तेनेति यथाश्वावांताशी तथात्यक्तस्य
पुनराःदानेति वितर्कप्रतिपक्षान् भावयेदित्यर्थः संप्रति वितर्काणां स्वरूपप्रकारकारणमःवांतरभेदफलानि पंचभिः पदैः क्रमेणावदन् प्रतिपक्षभा
वनं स्फुटयति वितर्क्यंत इति वितर्का हिंसादय इति स्वरूपोक्तिः तत्र हिंसा त्रिप्रकारा स्वयं कृता कुर्विति कारिता साधु साध्विति अनुमोदिता चेति तत्रैके
का पुनस्त्रिविधा भवति कारणभेदात् मांसचर्मादिलाभेनाःपकृतमःनेनेति क्रोधेन धर्मो मे भविष्यतीति मोहेन एवं नवविधा जाता हिंसा पुनः लोभ
क्रोधमोहाः प्रत्येकं त्रिविधा भवंति मृदुमध्याधिमात्रत्वेनेत तत्पूर्वं का हिंसा दयोपि मृदवो मध्या अधिमात्राश्च भवंति तथा कृता कारिता अनुमोदिता च प्र

वितर्कबाधने प्रतिपक्षभावनं ३३ वितर्का हिंसादयः कृता कारिता अनुमोदिता लोभक्रोधमोहपूर्विका मृदुमध्याधिमात्रा दुःखा
ज्ञानाऽनंतफला इति प्रतिपक्षभावनं ३४ त्येकं नवधा भवतीति हिंसायाः सप्तविंशतिभेदा भवंति मृदुमध्याधिमात्रा अपि प्रत्येकं त्रिधा भवंति मृदु
मृदुः मध्यमृदुस्तीव्रमृदुः मृदुमध्यो मध्यमध्यस्तीव्रमध्यः मृदुतीव्रो मध्यतीव्रस्तीव्रतीव्र इति एवं लोभो नवविध एवं क्रोधमोहाविति तत्पूर्वा कृता हिंसा स
प्तविंशतिभेदा भवति तथा कारिता अनुमोदिता चेत्येकाशीतिभेदा हिंसा भवति एवमनृतादिष्वपि योज्यं एवंभूता वितर्का दुःखं नरकादिकमःज्ञानं स्था १३
वरादिभावं भ्रांतिसंशयरूपं च अनंतं फलयतीति प्रतिपक्षाणां वितर्कशत्रूणां दोषाणां भावनमित्यर्थः नेन द्वेषचिंतनेन वितर्का हेया इत्युपदिष्टं भ
वति तद्धाने सति निर्विघ्नाय नियमा दश सिध्यंति तत्सिद्धौ चित्तशुद्धिद्वारा कैवल्यं अतो योगः सिध्यतीति तात्पर्यं संप्रति दशानां सिद्धिसूचकमःवां
तरफलं क्रमेण दर्शयति ॥ ३४ ॥ श्री॥०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अहिंसासिद्धौ सत्यां तस्याऽहिंसकस्य मुनिवर्यस्य सन्निधौ स्वभावविरुद्धानां अहिनकुलानामपि वैरत्यागो भवतीत्यर्थः ॥ सत्यप्रतिष्ठायां सत्यां क्रिया
धर्माधर्मरूपा तत्फलं स्वर्गादिकं तयोराश्रयो वाङ्मात्रेण दाता तत्स्वभावः तत्वं भवति यथा धार्मिको भूया इत्युक्ते भवति धार्मिकः स्वर्गमाप्नुहीत्युक्तमात्रा
दधार्मिकोऽपि तथैव भवतीत्यर्थः ॥ अचौर्ये दार्ढ्ये सति सर्वेषां दिव्यरत्नानामस्य संकल्पमात्रेण प्राप्तिर्भवतीत्यर्थः ॥ वीर्यनिरोधो हि ब्रह्मचर्यं तत्सिद्धौ
निरतिशयं सामर्थ्यं भवति येनाऽणिमाद्युपस्थितिर्भवति शिष्येषूपदेशः सद्यः फलतीति भावः ॥ अपरिग्रहशीलस्य तत्स्थैर्ये सति अतीतवर्त्तमानभावि
जन्मनां या कथंता किंप्रकारता तस्याः सम्यग्बोधो जिज्ञासापूर्वको भवतीत्यर्थः किंरूपं जन्म किंप्रकारकं किंहेतुकं किंफलकं किमवसानमिति शरी
रपरिग्रहविरोधिनी जिज्ञासा भवति ततः कार्यकारणसंबंधः पुरुषस्याऽजस्य जन्म नरदेवतिर्यक्प्रकारं क्लेशकर्महेतुकं दुःखैकफलकं पुरुषत

अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ३५ सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वं ३६ अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानं ३७ ब्रह्म
चर्यप्रतिष्ठायां वीर्यलाभः ३८ अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः ३९ शौचात्स्वांगजुगुप्सा परैरसंसर्गः ४० सत्वशुद्धिसौम
नस्यैकाग्र्येंद्रियजयात्मदर्शनयोग्यत्वानि च ४१ ॥ संतोषादनुत्तमः सुखलाभः ४२

त्वसंबोधावसानमित्याचार्यागमतो निश्चित्य
शरीरः सत्वपरिग्रहकामोऽननुभवतीति भावः उक्ता यमसिद्धयः अधुना नियमसिद्धय उच्यंते ॥ यो वाह्यशौचसिद्धः तस्य स्वांगे कायेऽशुद्धिमपश्य
तो जुगुप्सा भवति अशुचिस्वभावोऽयं कायः नात्राऽहंकारः कार्यः इति शौचपरस्य मम कायो न शुद्ध्यतीति किमु प्रमत्तपरकाय इति दोषदर्शिनः परकायै
रसंसर्गो भवतीत्यर्थः एवं वाह्यशौचसिद्धिमुक्त्वाऽतः शौचसिद्धिमाह ॥ शौचादित्यनुवर्त्तते भवंतीति वाक्यशेषः बुद्धिसत्वस्य रजस्तमोमलैर्ष्यादिम
लध्वंसः शुद्धिः ततः सत्वोत्कर्षः ततः स्थैर्यं ततो वाह्येंद्रियजयः ततः पुरुषख्यात्यर्हत्वमिति विभागः ॥ तृष्णाक्षयसिद्धौ अवश्यं निष्कामस्य निरतिश
यसुखाऽनुभवो भवति शुद्धसत्वोत्कर्षात् तथा च महाभारते ययातिगीता यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं तृष्णाक्षयसुखस्यैते नाऽर्हतः षोडशीं

स्वधर्मे कृच्छ्रचांद्रायणादिना क्लेशपापक्षयात् कायस्याऽणिमादिसिद्धिरिंद्रियाणां दूरसूक्ष्माऽर्थग्राह्यत्वसिद्धिर्भवति॥ इष्टमंत्रादिजपात् स्वेष्टदेवतायाः
संभाषणादि सिध्यति॥ ईश्वराऽर्पितसर्वभावस्य भक्तस्यैव योगसिद्धिर्भवति न चैवं सति यमादिसप्तांऽगवैयर्थ्यं स्यादिति वाच्यं अंगैर्भक्त्या वा योगसिद्धि
रिति विकल्पाऽभ्युपगमात् तदुक्तं ईश्वरप्रणिधानाद्वेति ननु भक्तिपक्षेऽगवैफल्यं यमादीनां भक्तावप्यंगत्वसंभवात्तेषां भक्तियोगोभयाऽर्थत्वं द
ध्नः इंद्रियक्रतूभयाऽर्थवत् अविरुद्धं न चाऽगानामाऽवश्यकत्वे नैरवसिद्धेः किं भक्त्येति वाच्यं भक्तिहीनोपायैर्दूरे योगसिद्धिः भक्त्या ऽन्तरवर्तिभिराऽस
न्नतमा योगसिद्धिरिति चिराचिरयोगरूपफलप्राप्तिसाधनत्वेन विकल्पोपपत्तेः सा चेश्वरे भक्तिः प्रत्यगात्मयोगविषयभिन्नविषयेति बहिरंगत्व
वाचोयुक्तिरित्यऽनवद्यं एवं यमनियमान् सह सिद्धिभिर्निरूप्यासनस्वरूपमाह॥ निश्चलं सुखावहं च यदाऽसनं तद्योगांगमित्यर्थः आस्यते
नेनेत्याऽसनं तद्द्विविधं बाह्यं शारीरं च तत्र चैलाजिनकुशोत्तरं बाह्यं शारीरं पद्मस्वस्तिकादीति विशेषः तत्र पद्माऽसनं प्रसिद्धं सव्यमाकुंचितचर

कायेंद्रियसिद्धिरशुद्धिक्षयात्तपसः ४३ स्वाऽध्यायादिष्टदेवतासंप्रयोगः ४४ समाधिरीश्वरप्रणिधानात् ४५ स्थिरसुखमा
सनं ४६ प्रयत्नशैथिल्याऽनंतसमापत्तिभ्यां ४७ ततो द्वन्द्वानऽभिघातः ४८ तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणाया म

णं दक्षिणजंघोर्वंतरे दक्षिणं च सव्यजंघोर्वंतरे निक्षिपेदिति स्वस्तिकाऽसनं द्वे पादतले वृषणसमीपे संपुटीकृत्य संपुटोपरि पाणिसंपुटिकां न्यसे
दिति भद्रासनं द्रष्टव्यमसंप्रत्याऽसनस्थैर्योपायमाह॥ स्वाभाविकः प्रयत्नश्चलत्वादाऽसनविघातकः तस्योपरमेणाऽसनं सिध्यति येन नाऽगमेजयो १४
भवति अनंते नागनायके स्थिरतरफणासहस्रविधृतविश्वमंडले चित्तस्य समापत्त्या देहाऽभिमानाऽभावेनाऽसनदुःखास्फूर्तेराऽसनं सिध्यतीति तत्सिद्धि
लिंगमाह॥ आसनजयात् शीतोष्णादिभिरऽताडनं भवति संप्रत्याऽसनसाध्यं प्राणायाममाह॥ आसनस्थैर्ये सति बाह्यकोष्ठ्यवाय्वोरंतर्बहिर्गति
विच्छेदः प्राणायाम इत्यर्थः सामान्यलक्षणमुक्त्वा लक्ष्यं प्राणायामं विभजते॥ ४९॥ श्री॥० श्री॥० श्री॥० श्री॥० श्री॥० श्री॥० श्री॥०

प्राणायामश्चतुर्विधः वाह्यवृत्तिरऽभ्यंतरवृत्तिस्तंभवृत्तिस्तुरीयश्चेतितत्रकोष्ठ्यस्यवायोरेचनेनवहिर्गतस्यवहिरेवधारणंवाह्यवृत्तिःसचरेचकः।
वाह्यवायोःपूरणेनांऽतर्गतस्यांऽतर्धारणमऽभ्यंतरवृत्तिः सचपूरकः।रेचनपूरणप्रयत्नंविनाप्राणस्यकेवलविधारकप्रयत्नेनगतिविच्छेदः स्तंभवृत्तिःस
चकुंभकः नाऽयंरेचकः अंतस्थत्वात्नाऽपिपूरकः तन्नशिलातलनिहितजलविंदुवच्छरीरेप्राणस्यसंकुचितत्वेनसूक्ष्मत्वात्योहिस्थूलोंऽतर्निरुद्धोदेहं
पूरयतिसपूरकः तस्माद्रेचकपूरकाऽभ्यासेनविनासकृत्प्रयत्नमात्रेणसूक्ष्मप्राणस्यकुंभकशब्दितस्यघटजलवन्निश्चलत्वेनदेहेऽवस्थानात्कुंभकस्तृ
तीयःसिद्धः त्रिविधोयंप्राणायामः देशकालसंख्याभिर्दीर्घः सूक्ष्मइतिपरिदृष्टः तत्ररेचकस्यवाह्योदेशोविषयः प्रादेशवितस्तिहस्तादिपरिमितोनिवीते
नासाग्रेइषीकातूलादिक्रियाऽनुमितः पूरकादस्त्वांऽतरोदेशःआपादतलमस्तकंपिपीलिकास्पर्शतुल्येनस्पर्शेनाऽनुमितःक्षणगणनयाज्ञेयःकालोमा
त्रागणनयाज्ञेयासंख्यास्वजानुमंडलंपाणिनात्रिःपरामृश्यछोटिकाऽवच्छिन्नःकालोमात्रासाहिस्वस्थस्यपुंसःश्वासप्रश्वासाभ्यांमिताभवति

वाह्याऽभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिःपरिदृष्टोदीर्घःसूक्ष्मः ५० वाह्याऽभ्यंतरविषयाऽक्षेपीचतुर्थः ५१ ॥ श्री॥०

तत्रषट्त्रिंशतिमात्राभिरऽभ्यासक्रमेणदीर्घइतिदृश्यतेऽधिकदेशकालव्यापित्वंप्राणनिरोधस्यदीर्घत्वंयथायथादीर्घइतिनिपुणेनदृश्यतेतथातथा।
प्राणस्यसूक्ष्मत्वेनदर्शनाद्दीर्घएवसूक्ष्मइतिपरिदृष्टोभवतीत्यर्थः तुरीयंप्राणायामंदर्शयति ।उक्तोवाह्योदेशोविषयः अभ्यंतरविषयस्तुहृदयनाभिच
क्रादिःतयोराऽक्षेपःसूक्ष्मदृष्ट्यापर्यालोचनंसयस्यपूर्वकालेस्तिसचतुर्थःस्तंभवृत्तिःतस्यापिदीर्घसूक्ष्मत्वंपूर्ववत्तनचाऽस्यकुंभकांऽतर्भावःशंकनीयः
रेचकपूरकयोरऽभ्यासेनजितवाह्याभ्यंतरविषयनिश्चयंविनैवसकृत्प्रयत्नमात्रेणस्तंभवृत्तिःकुंभकः तन्निश्चयपूर्वकःस्तंभवृत्तिः वहुप्रयत्नसाध्य
स्तुरीयइतिवैलक्षण्यादितिसंप्रतिचतुर्विधस्यप्राणायामस्ययोगांगत्वेद्वारभूतंफलमाह॥ ५१ ॥ श्री॥० श्री॥० श्री॥० ॥ श्री॥० ५१

CC-0. In Public Domain. Digitization by eGangotri

प्राणायामाऽभ्यासात्प्रकाशशीलस्य बुद्धिसत्वस्य पिधानं क्लेशपापरूपं क्षीयते तदुक्तं मनुना सर्वज्ञेन प्राणायामैर्दहेद्दोषान्निति किंच प्राणायामादाः
वरणक्षये सति मनसः सूक्ष्मत्वस्य धारणासु योग्यता भवतीत्यर्थः उक्तयमादिभिः संस्कृतचित्तस्य प्रत्याहारो भवतीति मत्वा तं लक्षयति शुद्धचित्तस्य श
ब्दादिभिः स्वविषयैरऽसंप्रयोगे सति वैराग्याद्विषयेभ्यो वियुज्य तत्वाऽभिमुखे सतीति यावत् इंद्रियाणां चक्षुरादीनां यश्चित्तस्य स्वरूपाऽनुकारः स्वविषया
ऽसंप्रयोगेन तत्वाऽभिमुखरूपः स प्रत्याहार इंद्रियाणि विषयेभ्यः प्रातिलोम्येनाह्रियंते स्मिन्निति व्युत्पत्तेरिंद्रियाणां विषयप्रसृताणां चित्तवत्तत्वाऽभिमुख
त्वं नास्तीति द्योतनार्थः इवशब्दः यथा मक्षिका मधुकरराजानं चलंतमऽनुचलंति स्थितमऽनुस्थिता भवंति तथा चित्ताऽनुसारीण्यीद्रियाणि चित्तनिरोधे ने
व निरुध्यंते नयत्नांतरेणेति तात्पर्यं प्रत्याहारस्य योगद्वारभूतं फलमाह ॥ अनिषिद्धविषयसेवा विषयतंत्रत्वं विना स्वेच्छया भोगः रागद्वेषाऽभावे सुख
दुःखाऽनुत्पादकं शब्दादिदर्शनमिंद्रियाणां वश्यता परमा विषयाऽशी विषयोगात् यातु विषयैः स्वाऽभिमुखं नीयमानानाऽमपींद्रियावलानां तत्वप्रतिग्र

ततः क्षीयते प्रकाशावरणं ५२ धारणासु च योग्यता मनसः ५३ स्वविषयाऽसंप्रयोगे चित्तस्य स्वरूपाऽनुकार इवेंद्रियाणां प्रत्याहारः
५४ ततः परमा वश्यतेंद्रियाणां ५५ इति साधनपादः समाप्तः २ देशबंधश्चित्तस्य धारणा १ ॥ तात्वेन विषयेष्वऽत्यंतमऽप्रतिपत्तिः राव
णस्वाऽभिमुखं नीयमानायास्त्रपि श्रीसीतायाः श्रीरामव्रतत्वेन राक्षसाधमाप्रतिपत्तिवत्सा परमेति जैगिषव्यः । प्रत्याहारादिंद्रियाणां परमा वश्यता
भवतीत्यर्थः ॥ एवं द्वितीयपादे क्लेशतनुकरणद्वारा योगसाधनं क्रियायोगं निरूप्य सप्रपंचं क्लेशकर्मविपाकानुक्त्वा तेषां हेयत्वार्थं दुःखत्वं दर्शयित्वा १५
हेयतद्धेतुमोक्षतद्धेतूनुपन्यस्य योगस्य बहिरंगयमादिपंचकं साऽवांतरफलं निरूपितं संप्रति धारणादित्रितयमंऽतरंगं संयमसंज्ञं वदन् संयमसाध्या वि
भूतयः श्रद्धाद्वारा कैवल्यफलकयोगप्रवृत्तिहेतवो वक्तव्या इति पादांतरमारभमाणो धारणां लक्षयति ॥ नाभिचक्रहृदयनासाग्रादौ देशे संप्रज्ञातयोगसि
द्धये चित्तस्य यो बंधः स्थिरीकरणं सा धारणेत्यर्थः तदुक्तं विष्णुपुराणे प्राणायामेन पवनं प्रत्याहारेण चेंद्रियं वशीकृत्य ततः कुर्याच्चित्तस्थानं शुभाश्रये प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्तिभगवतोरूपंसर्वोपाश्रयनिस्पृहम् एषावैधारणाज्ञेयायच्चित्तंतत्रधार्यतेतच्चमूर्त्तंहरेरूपंयादृक्चिंत्यनराधिपंतच्छ्रूयतामनाधारेधारणानोपपद्यतेप्रस
न्नवदनंचारुपद्मपत्रनिभेक्षणंसुकपोलंसुविस्तीर्णललाटफलकोज्ज्वलंसमकर्णांतविन्यस्तचारुकुंडलभूषणं कंबुग्रीवंसुविस्तीर्णश्रीवत्सांकि
तवक्षसं वलीत्रिभंगिनामग्ननाभिनाचोदरेणवै प्रलंबाष्टभुजंविष्णुमथवापिचतुर्भुजंसमस्थितोरुजंघंचसुस्थिरांघ्रिकरांबुजंचिंतयेद्ब्रह्मभूतंतंपीतनि
र्मलवाससामिति १ धारणासाध्यंध्यानंलक्षयति यत्रधारणाविजातीयवृत्तिपरिहारेयत्नापेक्षाभवति तत्रैवयाप्रत्ययानांवृत्तीनामेकताननतायत्नमन
पेक्ष्यैकविषयतातद्ध्यानमित्यर्थः तद्रूपप्रत्ययेकाग्र्यसंततिश्चान्यनिस्पृहातद्ध्यानंप्रथमैरंगैःषड्भिर्निष्पाद्यतेनृपेतितत्रैवोक्तंखांडिकजनकंप्रतिके
शिध्वजेनसमाधिंलक्षयति ॥ अतिस्वच्छचित्तवृत्तिप्रवाहरूपंध्यानमेवार्थमात्रस्वरूपेणनिर्भासमानंसमाधिः मात्रचोर्थमाहस्वरूपशून्यमिवेतिध्या
नस्वरूपज्ञानशून्यंइवशब्देनध्यानस्यसत्तांद्योतयति यथास्वच्छस्फटिकमणिःकुसुमरूपेणैवनिर्भासतेनस्वरूपेणतद्वदित्यर्थः विजातीयवृत्ति।

तत्रप्रत्ययैकताननताध्यानं २ तदेवार्थमात्रनिर्भासंस्वरूपशून्यमिवसमाधिः ३ त्रयमेकत्रसंयमः ४ तज्जयात्प्रज्ञालोकः ५
॥ तस्यभूमिषुविनियोगः ६ ॥

छिन्नाधारणाअविछिन्नंध्यानंध्येयध्यानध्यातृस्फूर्त्तिमद्ध्येयमात्रस्फूर्तिमान्समाधिः सएवदीर्घकालव्यापीसन्संप्र
ज्ञाताख्योयोगइत्युच्यतेध्येयस्फूर्त्तिशून्योऽसंप्रज्ञातइतिभेदः ३ धारणाध्यानसमाधित्रयस्यव्यवहारलाघवफलांसंयमसंज्ञामाह ॥ एकविषयंत्रयंसं
यमसंज्ञंभवतीत्यर्थः ४ संयमस्यफलमाह तस्यसंयमस्यजयात्स्थैर्यात्प्रज्ञायाःसमाधिजायाः आलोकोनैर्मल्यंभवतिभ्रांतिसंशयादिमलशून्या
ध्येयतत्वस्फूर्तिर्भवतीत्यर्थः ५ क्वपुनर्नियुक्तस्यसंयमस्येदंफलमितिप्रश्नस्योत्तरंपठति स्थूलसूक्ष्मादिभूताः सवितर्कानिर्वितर्कासविचारानिर्वि
चारादयःसंप्रज्ञातयोगावस्थाएवभूमयःतासुसंयमस्यविनियोगः संयमेनपूर्वभूमिंजित्वातदुत्तरांभूमिंजिगीषेत् नहिस्थूलमसाक्षात्कृत्यसूक्ष्मंसा।
क्षात्कर्तुंशक्यमितिभावः ६ ननुयोगांगानामध्येंगपंचकंपूर्वपादेनिरूपितंत्रयमत्रनिरूपितंतत्रकोहेतुरित्यत्राह ॥ ॥० ॥० ॥०

पंचयमादीनि संप्रज्ञातसमाधेः प्रतिबंधकस्य चित्तकायप्राणेंद्रियमलस्य निवृत्तिद्वारा बहिरंगानि धारणादित्रयं त्वंगिनः समानविषयतया साक्षात्स्वरूपो-
पकारकत्वादंतरंगं अतः पूर्वेभ्यः पंचभ्यः इदमंतरंगमिति कत्वात तद्भूमिविनियोगात्तत्पर्थमत्र निरूपितमित्यर्थः ७ असंप्रज्ञातस्य धारणादित्रयम-
पि बहिरंगम् अंगिनो निर्विषयत्वेन त्रयस्य सविषयत्वेन समानविषयत्वाभावात् अतो व्युत्थानरूपस्य त्रयस्य संप्रज्ञातपरिपाकप्रज्ञाप्रसादरूपप-
रवैराग्यद्वारा निरोधे सति संप्रज्ञातस्यापि निरोधान्निर्वीजो भवति पारंपर्येणोपकारकत्वाद्बहिरंगमित्यर्थः ८ संप्रति संयमाद्विभूतीर्वक्तुकामः संय-
मस्य लक्ष्यान्यपरिणामान् दर्शयति व्युत्थानं संप्रज्ञातः स निरुध्यते येन तत्परवैराग्यं निरोधः तत्र यदा व्युत्थानसंस्कारस्याभिभवो निरोधसंस्कारस्य प्रा-
दुर्भावश्च भवतस्तदा निरोधसंस्कारस्यासंप्रज्ञातस्य क्षणेनावसरेण युक्तं चित्तं भवति तस्य निरोधक्षणस्य चित्तस्य धर्मिणस्त्रिगुणत्वेन चलस्य सदा प-

त्रयमंतरंगं पूर्वेभ्यः ७ तदपि बहिरंगं निर्वीजस्य ८ व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोध-
परिणामः ९ तस्य प्रशांतवाहिता संस्कारात् १० सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः ११ ॥ श्री ॥॰ ॥

रिणामशीलस्याभिभूतप्रादुर्भूतयोः संस्कारयोर्धर्मित्वेन योन्वयः स निरोधाख्यः परिणाम इत्यर्थः परवैराग्यरूपवृत्त्या संप्रज्ञातवृत्ते रस्तत्संस्कारेण
तत्संस्कारस्य चाभिभवे सति परवैराग्यसंस्कार एवाभिव्यक्तः सन्निर्वीजनिरोधपरिणाम इति भावः ९ सर्वात्मना व्युत्थानसंस्काराभिभवे सति निरोध-
स्थैर्यमाह निरोधसंस्कारप्रचयान्निरस्तसमस्तव्युत्थानसंस्कारमलस्य चित्तस्य निरोधसंस्कारपरंपरामात्रवाहिता भवति ननु तर्हि चलमेव तत्तदापि १६
चित्तं सत्यं तदापि तादृशी परिणाममाला स्थैर्यमित्युच्यत इति भावः १० एवं निर्वीजावस्थामुक्त्वा संप्रज्ञातपरिणाममाह चित्तस्य सर्वार्थता नानार्था-
कारत्वं विक्षिप्तत्वरूपो धर्मः एकाग्रता वक्ष्यमाणो धर्मः तयोर्यथाक्रमं क्षयोदयौ तिरोभावप्रादुर्भावौ न सतो विनाशो नासत उत्पत्तिस्तौ समाधिपरिणाम
इत्यर्थः अभ्यासेन विक्षेपात्यये सत्येकाग्रतास्थैर्ये समाधिरिति भावः ॥ ११ ॥ श्री॥॰ श्री॥॰ श्री॥॰ श्री॥ श्री॥॰ श्री॥॰ ११

शांतोऽतीतः उदितो वर्त्तमानः तावेकविषयत्वेनतुल्यौ चतौप्रत्ययौ चतुल्यप्रत्ययौ चित्तस्यनैरंतर्येणावृत्तिद्वयमेकविषयमेकाग्रताख्यः परिणाम
इत्यर्थः इयमेकाग्रताद्वादशगुणाधारणाभवतिद्वादशगुणाधारणाध्यानंद्वादशगुणंध्यानंसमाधिः द्वादशगुणः समाधिः संप्रज्ञाताख्यो योग इतिभे
दः १२ मनःपरिणामेषुनिरोधसमाध्येकाग्रतासूक्तान्यायमन्यत्रातिदिशति भूतेषुपृथिव्यादिषुधर्मिषुचक्षुरादींद्रियेषुचपरिणामस्त्रिविधः धर्मपरि
णामोलक्षणपरिणामोऽवस्थापरिणामश्चेति एतेनमनःपरिणामव्याख्यानेनव्याख्याताभवंतितथाहिमृदःपिंडरूपधर्माऽभिभवेसतिघटरूपोधर्मः
प्रादुर्भवति यथाचित्तस्यव्युत्थानात्ययेनिरोधोद्भवः सोयंधर्मपरिणामः लक्षयतिकार्यरूपंधर्मंव्यावर्त्तयतीतिलक्षणंकालत्रयम् अनागतोध्वावर्त्तमानो
ध्वातीतोध्वेतिकालत्रयमेवाध्वत्रयमित्युच्यते तत्रतद्धर्मस्यघटस्यानागतत्वंप्रथमोध्वावर्त्तमानत्वंद्वितीयोध्वाऽतीतत्वंतृतीयोध्वासोयंलक्षणपरिणा
मः अनागतत्वंहिधर्मोवर्त्तमानातीतधर्माभ्यांव्यावर्त्तयति एवंवर्त्तमानत्वादिकमपिलक्षणंमंतव्यंएवंलक्षणपरिणामस्यतदवच्छिन्नस्यधर्मस्यवाऽव-

शांतोदितौतुल्यप्रत्ययौचित्तस्यैकाग्रतापरिणामः १२ एतेनभूतेंद्रियेषुधर्मलक्षणावस्थापरिणामाव्याख्याताः १३ शांतो
दिताव्यपदेश्यधर्मानुपातीधर्मी १४

स्थापरिणामोद्रष्टव्यः सयथा आगामिकल्यभावीअनागततमः एतत्कल्यभाव्यनागततरः श्वोभावीअना
गतः सद्योजातोवर्त्तमानतमइत्यादिपूर्वत्वंतथावर्त्तमानस्यनवत्वपुराणत्वादयोऽवस्थापरिणामः एवंप्रतिक्षणपरिणामिनः सर्वेभावाऋतेचितिश
क्तेरितिसंक्षेपः १२ यस्यायंत्रिविधःपरिणामः तंधर्मिणंदर्शयति शांताः कृतव्यापाराअतीताः उदिताःजलाहरणादिव्यापाराविष्टाः वर्त्तमानाअव्यप
देश्याः शक्तिरूपेणमृदादिषुधर्मिषुस्थिताः अनागताः तेहिसूक्ष्मतयाधर्मिणोधर्मांतराद्भेदेनव्यपदेशेनव्यपदेष्टुंनशक्यंते अतएवसर्वकार्यंशक्ति
रूपेणाव्यपदेश्यंकारणमात्रसंभावितमितिसर्वंकारणंसर्वकार्यात्मकंभवतिदृश्यतेहिदावदग्धवेत्रबीजात्कदलीखंडोद्भवः नहितत्रासतउद्भ
वः संभवति अभिव्यंजकानांदेशकालकर्मादीनांवैचित्र्यात्क्वचित्किंचिदेवोद्भवतीतिलोकेकार्यकारणव्यवस्थायोगसिद्धानांदेशादिप्रतिबंधाभा

वात्सर्वस्मात्सर्वमुद्भवति नानेतानष्टांतोदितान्यपदेश्यानघटीयं न्नवदनिशमावर्त्तमानान्योनुपततिश्चन्वेति सोनुपातीधर्मीयथामृत्सुवर्णादिश्चूर्ण
पिंडघटरुचकाद्यन्वयीधर्मीत्युच्यते १४ नन्वेकस्यधर्मिणः परिणामवहुत्वेकोहेतुरित्यतश्चाह ॥ मृदश्चूर्णपिंडयोः पिंडघटयोर्घटकपालयोःमौर्वा
पर्यरूपक्रमस्यान्यत्वंदृश्यमानमेकस्याएवमृदः परिणामानांचूर्णादीनांधर्माणामन्यत्वेहेतुर्ज्ञापकः सएवमनागतवर्तमानातीताध्वनांक्रमाद्व
क्षणपरिणामान्यत्वंधर्माणांज्ञेयंतथाक्षणपरंपरयाघटस्त्रीत्यादीनांदुर्लक्ष्यसूक्ष्मपरिणामक्रमेणनवत्वपुराणत्वाद्यवस्थापरिणामान्यत्वंचोध्यंदृश्य
तेहिकुसूलरक्षितव्रीहीणांकालेनपाणिस्पर्शमात्रेणचूर्णावस्थानहीयंक्षणिकपरिणामक्रमंविनानवानांवादृष्टानामकस्माद्भवति तस्माद्धर्मिणः
परिणामिनित्यस्यधर्माभिन्नाःधर्माणांलक्षणानितेषामवस्थाइतिस्थितंधर्म्यनन्यत्वान्लक्षणिकत्ववादइत्यनवद्यं तत्रकेचित्परिणामाश्चित्तस्यप्र
त्यक्षाःकामसुखादयः केचित्वागमानुमानगम्याःसप्ततदुक्तंभाष्येनिरोधकर्मसंस्काराःपरिणामोथजीवनंचेष्टाशक्तिश्चचित्तस्यधर्मादर्शनव

क्रमान्यत्वंपरिणामान्यत्वेहेतुः १५ परिणामत्रयसंयमादतीतानागतज्ञानं १६ ॥ श्री॥०

र्जिताइतिपरोक्षाइत्यर्थः कर्मपुण्यापुण्यापूर्वंत्रिगुणत्वाच्चित्तस्यप्रतिक्षणपरिणामोनुमेयः जीवनंश्वासादिलिंगगम्यंप्राणधारणंचेष्टाक्रि
याचित्तस्यागात्रचेष्टागम्याकार्याणांसूक्ष्मावस्थाशक्तिः १५ एवंसंयमधर्मस्यविषयाधर्मादयोनिरूपिताः संप्रत्यापादसमाप्तेःसंयमस्यतत्त
द्विषयेवशीकारज्ञानायविभूतयउच्यंते चित्तसत्वंहिस्वतःसर्वप्रकाशस्वभावंरजस्तमोमलप्रतिवंधस्यसंयमेननिवृत्तौसत्यांप्रमाणमन
पेक्ष्यसर्वंजानातीतिस्थितिः तत्रास्मिन्धर्मिण्येतेधर्माःअनागतादयःएतेऽध्वानःएताअवस्थाइतिधर्मलक्षणावस्थारूपपरिणामत्रय १७
संयमाद्योगिनोऽतीतानागतवस्तुसाक्षात्कारोभवतीत्यर्थः॥ १६ ॥

वर्णातिरिक्तो वर्णाभिव्यंग्यो नित्यो निर्भागः शब्दः स्फोटः स द्विविधः गौरित्येकं पदमिति श्रोत्रग्राह्यः पदस्फोटः गामानयेत्येकं वाक्यमिति ग्राह्यो वाक्यस्फो
टः न च क्षणिकानेकवर्णेष्वेकत्वमत्यक्षबुद्धिः तथा हि गौरिति त्रयो वर्णा गणशोरिपयः पदेषु विद्यमानेन गकारौकारविसर्जनीये विजातीयस्फोटत्रयमव्यं
जकैः सदृशा भवंति तुल्यस्थानत्वान्न तदुक्तं अष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा जिह्वामूलं च दंताश्च नासिकौष्ठौ च तालु चेति एवं स्पर्शानां
स्पृष्टप्रयत्नः स्वराणामूष्मणां च विवृतमित्यादि प्रयत्नसादृश्यं द्रष्टव्यम् तथा च प्रयत्नविशेषतुल्यस्योदानवायोराहत्या स्थानैः संयोगे सत्यऽष्टस्थान।
स्थेन वागिंद्रियेणोत्पद्यमाना गकारादयो वर्णा ध्वन्यभेदेन श्रोत्रप्रत्यक्षानुभववेद्याः प्रत्येकं गोपदस्फोटं व्यंजयंतो गणादिस्फोटैः सदृशमव्यक्तं व्यंजयं
ति स्वनिष्ठसादृश्यानां स्वव्यंग्ये समारोपात्तु न गकारादयस्त्रयः क्रमवंतः स्वानुभवजनितसंस्कारसहितश्रोत्रलब्धजन्मन्येकस्यां बुद्धौ भासमानत्वेन
मिलिताः स्वस्फोटान्तराद्व्यावृत्तं व्यक्तं तं गोपदस्फोटं निर्भागमपि स्वतादात्म्येनारोपितसादृश्यात्मकभागवंतमक्रमं नित्यमपि सक्रममनित्यमि

शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानं १७

व व्यंजयंति मलिनवक्त्रादर्शो निर्मलमृजुमुखं स्वसादृश्यमारोप्य मलिनं वक्रमिव यथा व्यंजयति तद्वत् एवं वर्णैरभिव्यक्तः स्फोटोऽर्थबोधकः न च
वर्णोऽर्थस्यैव प्रत्येकमव्यक्तामेलनेन व्यक्ततराभिव्यक्तिरस्तु किं स्फोटेनेति वाच्यमव्यक्ताव्यक्तत्वस्य प्रत्यक्षज्ञानधर्मस्य परोक्षार्थज्ञाना
स्यत्वाद्योगादेकं पदमेकं वाक्यमिति स्फोटज्ञानं श्रोत्रजप्रत्यक्षमिति तस्यैव व्यक्ताव्यक्तत्वे तत्त्वं विस्तरेण अस्य शब्दस्य शब्दप्रत्ययाभ्यामः
भेदेन विकल्पितेन संकीर्णोऽर्थसंकेतग्रहो लोकस्येति पूर्वप्रतिपादितमत यागौरिति शब्दो गौरित्यर्थो गौरिति प्रत्यय इत्यावालपंडितं शब्दार्थप्रत्य
यानामितरेतराभेदाध्यासात्संकरः प्रसिद्धः तेषां शास्त्रयुक्तिभ्यां यः प्रविभागः प्रसिद्धः वर्णव्यंग्यपदं पदव्यंग्यवाक्यं शक्त्यादिवृत्त्या बोधकमिति शब्दा
तत्वं अर्थो द्रव्यगुणकर्मजात्यादिभिर्वाच्यो लक्ष्यश्चेत्यर्थतत्वं शब्दजन्योऽर्थविषयो बुद्धिस्थप्रत्यय इति ज्ञानतत्वमिति गोशब्दवत् सर्वत्र विभागोऽ

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन्विभागे संयमात्सर्ववशत्वादिवशीकारसूचकं सर्वभूतानां पशुपक्ष्याऽऽदीनां रुतज्ञानं भवति इमम् अर्थमेते वदंतीति संयमी जानातीत्यर्थः ॥ अनु
भवक्लेशजाः स्मृतिक्लेशहेतवः कर्मजाः सुखदुःखहेतव इतीमे संस्काराः संति चित्तस्य धर्माः पूर्वजन्मपरंपरासंचितास्तेषु स्वतेषऽनुमितेषु च संयमेन सा
क्षात्कृतेषु तद्वत्तुत्वेन स्वीयपरकीयपूर्वजन्मपरंपरायाः साक्षात्कारो भवतीत्यर्थः ॥ अत्र भगवान् जैगीषव्य उदाहरणं तस्य किल योगिवर्यस्य प्रकृतिवशि
नः संस्कारसाक्षात्कारात् दशसु महाकल्पेषु देवतिर्यङ्नराऽऽदियोनिषु जन्मपरंपरां साक्षात्कृतवतो दिव्यविवेकख्यातिश्च प्रादुरभवत् । तं भगवान् आ
वट्यः पप्रच्छ भगवंस्त्वया दृष्टेषु दशकल्पेषु सुखदुःखयोः किमधिकमनुभूतं जैगीषव्य आह हंत भो आयुष्मन् देवमनुष्यादिषु पुनः पुनरुत्पद्यमानेन मया किंचिद
नुभूतं मया तत्सर्वं दुःखमेवेति आवट्य आह किं प्रकृतिवशित्वमपि दुःखमेव येन दिव्या भोगा अक्षयाः संकल्पमात्रेणोपतिष्ठंत इति स उवाच सत्यं
लौकिकसुखापेक्षया प्रधानवशित्वमनुत्तमं परं कैवल्यापेक्षया दुःखमेव यतस्तृष्णातंतुरनुच्छिन्नः सर्वदुःखाकरः तद्विच्छेदात्कैवल्यसुखं प्रस

संस्कारसाक्षात्करणात्पूर्वजातिज्ञानं १८ प्रत्ययस्य परचित्तज्ञानं १९ न च साऽऽलंबनं तस्याविषयीभूतत्वात् २० ॥ ❀

न्नमनुत्तममिति भाष्यस्य व्याख्यायिका ननु यत्र संयमस्तस्य साक्षात्कार इति नियमात् कथं संस्कारसंयमात्पूर्वजन्मज्ञानमिति चेत् सत्यं साऽनुबंधसंस्कार
संयमादनुबंधत्वेन पूर्वजन्मनो ज्ञानमुपपन्नमिति मंतव्यं सिद्ध्यंतरमाह परचित्तस्य संयमात्तत्साक्षात्कारो भवतीत्यर्थः किं संस्कारसाक्षात्कारात्तद
नुबंधज्ञानवत्परचित्तसाक्षात्कारात्तदालंबनं ज्ञानं भवति नेत्याह परचित्तमात्रं साक्षात्क्रियते चत्वऽर्थः सालंबनं स्वविषयं तु न साक्षात्क्रियते १८
तस्य साऽऽलंबनस्याऽज्ञातत्वात् लिंगादिना ज्ञाते हि संयमप्रवृत्तिः नाऽज्ञाते तथा च यथा संस्काराणां संस्कारत्वलिंगेन जन्मांतरे याऽदृष्टस्तं न दृश्याप्यु
पपद्यते हिंस्राहिंस्रमृदुक्रूरे तस्मात्तत्स्यरोचने द्रूत्याऽऽद्याऽऽगमेन च जन्मांतरानुबंधित्वं ज्ञातुं शक्यं न तथा परस्य चित्तममुकविषयमिति ज्ञातुमश
क्यं लिंगाद्यभावात् चित्तमात्रं तु परस्य हर्षादिलिंगेन सुज्ञातं यदि परचित्तं ज्ञाता संयमेन साक्षात्कृत्याऽस्येदानीं किमालंबनमिति स्वचित्तं प्रणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यत्तु चित्ताऽभेदात्साक्षित्वं तेन इति विशेषः सिद्ध्यंतरमाह ॥ कायस्य यद्रूपं चाक्षुषत्वप्रयोजकमस्ति तस्मिन्संयमात्तस्य रूपस्य परचक्षुर्ग्राह्य-
त्वाऽनुकूला याः शक्तिस्तंभे प्रतिबंधे सति परचाक्षुषज्ञानाविषयत्वे जाते तद्धानं योगिदेहस्याऽचाक्षुषत्वं यथाकामं सिध्यतीत्यर्थः एतेन स्वीयश-
ब्दस्पर्शरसगंधानां संयमाच्छ्रोत्राद्यग्राह्यत्वसिद्धिरुक्ता भवतीति विभूत्यंतरमाह। पूर्वजन्मकृतमिदानीं स्थितं कर्म द्विविधं सोपक्रमं निरुपक्रमं च
फलदानव्यापारयुक्तं शीघ्रविपाकं च सोपक्रमं साऽतपदेशे प्रसारितेनाऽर्द्रवस्त्रेण शीघ्रं शुष्यता तुल्यं कालांतरे फलप्रदमिदानीं निर्व्यापारं चिरविपा-
कं निरुपक्रमं निराऽतपदेशे पिंडीकृताऽर्द्रवस्त्रतुल्यं तत्र संयमेऽस्य साक्षात्काराद्विपाकस्याऽयुषोऽवसानमपरांतशब्दितं ज्ञायते परस्य प्रजाप-
तेरंतो महाप्रलयः नरादीनां मरणमपरांतः तस्य ज्ञानमम्ऽमुष्मिन्देशेऽमुककाले मम देहवियोग इति साक्षात्कारः तत्र सोपक्रमकर्मसाक्षात्कारेण तद्वि-
पाकस्य मृत्योरिति भोगार्थं बहुशरीराणि गृहीत्वा योगी स्वेच्छया म्रियते एकेन तत्र तद्भोगे मरणाविलंबः प्रसंगादाह अरिष्टेभ्यो वेति तत्राध्यात्मिकाः अरि-

कायरूपसंयमात्तद्ग्राह्यशक्तिस्तंभे चक्षुःप्रकाशासंप्रयोगेऽन्तर्धानं १९ सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरांतज्ञा-
नमरिष्टेभ्यो वा २० मैत्र्यादिषु बलानि २१ बलेषु हस्तिबलादीनि २२ प्रवृत्त्याऽलोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञा-

ष्टानि कर्णपिहितकर्णो पुटस्य प्राणघोषाऽश्रवणादीनि आधिभौतिकानि यमभटदर्शनादीनि आधिदैविकान्यकस्मात्स्वर्गदर्शनादीनि एतान्यरि-
वत्रासयंत्यऽरिष्टानि त्रिविधानि मरणलिंगानि तेभ्यो वा मरणज्ञानं भवत्ययोगिनोपीत्यर्थः ॥ पूर्वं मैत्रीकरुणामुदितासु संयमो विहितस्तेन तासां ब-
लानि वीर्याणि भवंति यैर्योगी प्राणिमात्रस्य सुखकरः सुहृद्भवति दुःखादुद्धर्ता भवति अपक्षपाती भवति उपेक्षा तौदासीन्यमात्रं न तस्य बलं किंचिदः
स्ति संयमाऽभावादित्यर्थः ॥ हस्तिहनुमद्गरुडादिबलेषु तद्भावने संयमात्तानि बलानि योगिनः प्रादुर्भवंति चित्तस्य स्वतः सर्वसामर्थ्यादित्यर्थः ॥ ज्योति-
ष्मती प्रवृत्तिः प्रागुक्ता तस्याः ज्योतिः साक्षात्काररूपप्रवृत्तेर्यस्त्वालोकस्त्वास्पदं सर्वतो विप्रसृतं निर्मलबुद्धिसत्त्वं तस्य सूक्ष्मे परमाण्वादौ भूतव्यव

हितेनिद्धाःऽदोविप्रकृष्टेमेर्वेःतत्रवर्त्तिरसायनाःऽदोन्यासात्मक्षेपात्तेषांज्ञानंसाक्षात्कारोभवति।सौरालोकसंयोगात् घटादिज्ञानवदित्यर्थः एवंसंयमेनसा
क्षात्कृतवृध्याःलोकद्वाराज्ञानमुक्ताभीतिकेतद्द्वारात्साह॥ दिविदेदीप्यमानमार्त्तंडमंडलेसुषुम्नाद्विद्वारकेसहस्ररश्मिमालिनिसंयमाद्दृश्याःभिन्नंचित्तं।
चतुर्दशभुवनानिसाक्षात्करोतीत्यर्थः॥ चंद्रसंयमान्नक्षत्राणांसन्निवेशविशेषंसाक्षात्करोतिसूर्यस्यनक्षत्राःभिभावकत्वात्तत्संयमात्तज्ज्ञानंनभवतीतिभा
वः॥ध्रुवेसंयमात्तासांताराणांगतिंजानातिइयंताराऽनेनग्रहेणसहाऽनेनयथाएतावंतंकालंगच्छतीति एवंवाह्यसिद्धीरुक्ताध्यात्मिकसिद्धीराह॥ काय
स्यमध्यभागेयन्नाभिचक्रंआधारलिंगचक्राभ्यांचतुःषट्पत्राभ्यांउपरिस्थितंदशपत्रंतस्मिन्संयमाद्देहस्यसंनिवेशंजानातिवातपित्तश्लेष्माणस्त्व
योदोषास्त्वक्रुधिरमांसस्नाय्वःस्थिमज्जाशुक्रानिसप्तधातवःतेषांपूर्वंपूर्वंवाह्यमित्येषकायविन्यासः॥जिह्वातंतोरधस्तात्कंठस्यकूपाकारःप्रदे
शोऽस्तियत्रप्राणादेःसंघर्षात्क्षुत्पिपासेभवतः तत्रसंयमात्तन्निवृत्तिरित्यर्थः॥कूपादधउरसिकूर्माकारानाड्यःस्ति तत्रसंयमात्तत्प्रविष्टस्यचित्तस्य

भुवनज्ञानंसूर्येसंयमात् २६ चंद्रेताराव्यूहज्ञानं २७ ध्रुवेतद्गतिज्ञानं २८ नाभिचक्रेकायव्यूहज्ञानं २९ कंठकूपेक्षुत्पिपासानि
वृत्तिः ३० कूर्मनाड्यांस्थैर्यं ३१ मूर्द्धज्योतिषिसिद्धदर्शनं ३२ प्रातिभाद्वासर्वं ३३॥ स्थैर्यंसिद्ध्यतीत्यर्थः॥ शिरःकपालेयच्छिद्रंब्रह्मरंध्राख्यं

सुषुम्नायोगाद्धृदयस्थचित्तमणिप्रभायोगाच्चभास्वरंमूर्द्धज्योतिः तत्रसंयमात्सिद्धानःदृश्यानःपिपश्यतीत्यर्थः॥ विवेकख्यातिर्हिप्रसंख्यानंसंसार १९
तारकंतदर्थंसंयमेक्रियमाणेप्रसंख्यानोदयसूचकंप्रतिभयाऊहमात्रेणजातंप्रातिभंज्ञानंभवतितेनवायोगीसर्वंजानातियथासूर्योदयेसूच
काःऽरुणप्रभयालोकःपश्यतितद्वत् राजवार्तिकेतुसर्वंनिमित्तानःऽपेक्ष्यमनोमात्रजन्यंयथाऽर्थस्फटिस्तुत्पद्यमानंप्रतिभातस्याःसंयमात्प्रातिभं
विवेकख्यातेःपूर्वभावितारकमुदेतितेनसर्वंयोगीजानातीतिव्याख्यातम्॥ ३३ ॥ श्री॥०

अधोमुखेहृत्पद्मेचित्तस्यस्थानेसंयमात्स्ववासनस्यचित्तस्यसंविद्भवतीत्यऽर्थः॥ बुध्यात्मनोर्भोग्यभोक्तृत्वेनाऽत्यंतभिन्नयोर्यः प्रत्ययाऽविशेषः बुद्धिप
रिणामैःसुखदुःखमोहप्रत्ययैःपुरुषस्यप्रतिविंवग्राहिभिःऽविशेषःसारूप्यंप्रतिविंवद्वारासुखाद्याऽरोपःसभोगोबुद्धिस्थोदृश्यत्वात्परार्थःपु
रुषस्यभोक्तुःशेषभूतस्तस्मात्पराऽर्थाद्भोगाच्चित्प्रतिविंवोपसर्जनकप्रत्ययरूपाज्जडाद्ऽन्यश्चित्स्वभावः प्रतिविंवःस्वाऽर्थोनान्यशेषः तत्रसंयमात्पु
रुषस्यसाक्षात्कारोभवतिसोऽपिस्वप्रकाशेनपुरुषेणादृश्योबुद्धिस्थोनपुरुषंविषयीकर्तुमीष्टेकिंत्वऽनात्माकारस्वशून्यत्वेनात्मनाप्रतिविंवग्राहि
त्वात्पुरुषज्ञानमित्युच्यते तथाचश्रुतिः विज्ञातारमरेकेनविजानीयादितिसंप्रत्यऽस्यसंयमस्यपुरुषसाक्षात्कारात्प्रागभवाःसिद्धीर्दर्शयति॥ ततः
स्वाऽर्थसंयमात्प्रातिभंपूर्वोक्तंसर्वगोचरंज्ञानंमनोमात्रेणयोगजसुकृतधर्माऽनुगृहीतेनजायतेदिव्यानांशब्दस्पर्शरूपरसगंधानांग्राहकाणिश्रो-

हृदयेचित्तसंवित् ३४ सत्त्वपुरुषयोरऽत्यंतासंकीर्णयोः प्रत्ययाऽविशेषोभोगः परार्थात्स्वाऽर्थसंयमात्पुरुषज्ञानं ३५ ततः
प्रातिभश्रावणवेदनादर्शास्वादवार्त्ताजायंते ३६ तेसमाधावुपसर्गाव्युत्थानेसिद्धयः ३७ वंधकारणशैथिल्यात्प्रचारसंवे
दनाच्चचित्तस्यपरशरीराऽवेशः ३८॥ त्वक्चक्षुर्जिह्वाघ्राणानिक्रमेणश्रावणवेदनादर्शास्वादवार्त्तासंज्ञानिजायंतेदिव्यशब्दग्राहकंश्रोत्रं
यदायोगिनोभवतितदातस्यश्रोत्रस्यश्रावणमितितांत्रिकीसंज्ञाभवतितथाघ्राणस्यवार्त्तासंज्ञेत्याद्यूहनीयं ननुतत्र्यंयेयोगीकृतकृत्यइत्यत
आह तेप्रातिभादयःसमाधौनिःश्रेयसफलेरतस्योपसर्गाविघ्नाभवंतिअतोमुमुक्षुऽर्थीताऽनुपेक्षतेनस्यात्मसंवोधनंविनासिद्धिकोद्याऽपिकृ
तकृत्यताभवतितदुक्तंपरमगुरुणाश्रीकृष्णेनएतद्बुध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारतेतिव्युत्थानेरतस्यतुताःसिद्धयोभवंतीत्यर्थः तदेवंसं
यमस्यज्ञानरूपांविभूतिमात्मदर्शनांतामुक्त्वाक्रियारूपामाह सर्वत्रव्याप्तिशीलस्यचित्तस्यस्वशरीरमात्रेसंकोचेनस्थितिर्वंधः तस्यकारणंधर्माऽध
र्मौतयोःसंयमेनशैथिल्यंभवतिप्रचरत्यऽनेनचित्तमितिप्रचारोनाडीसंघःतस्याऽपिसंयमेनसंवेदनंअधुनाऽनयानाड्यासंचरतीतिज्ञानंभवतितथा

CC-0. In Public Domain. Digitization by eGangotri

यो॰टी॰ प्राणेंद्रियमार्गेनाडीज्ञानंभवतितथाचवंधकरज्जुनाशेमार्गज्ञस्यस्वपरवेश्मप्रवेशवच्चित्तस्यपरकायेमृतेजीवतिवाप्रवेशोभवतिचित्तमऽन्विंद्रिया
म॰ णिविशंतिमधुकरराजमिवमक्षिकाइत्यर्थः द्वयीखल्विंद्रियाणांप्रवृत्तिःवाह्यरूपाद्याऽलोचनरूपाआंतरीजीवनयोनिप्रयत्नरूपासर्वकरणसाधार
२० णीअस्याःकार्याःपंचप्राणादयःतत्रनासिकाग्रादाऽहृदयंस्थितःप्राणःआहृदयाऽदानाभिस्थितःसमानःभुक्तंसमंनयतीतिआनाभेराऽपादतलंस्थि
तोऽपानोमलमऽपनयतीतिआनासाग्रादाऽशिरोवृत्तिरुदानःउत्क्रांतिहेतुःसर्वदेहव्यापीव्यानःतेषुप्राणःश्रेष्ठःतत्रोदानस्यसंयमेनजयाद्दऽधिपंक
कंटकादिष्वऽसक्तोयोगीलघुत्वादुपरिगच्छतिस्वेच्छयामरणंचलभतइत्यर्थः नाभिनिकटस्थाऽग्निव्यापिनःसमानस्यवशीकाराद्दऽग्नेर्ज्वलनंभवतिये
नाऽज्वलन्निवदृश्यतइत्यर्थःएवंप्राणाऽदिजयान्स्वेच्छयातत्क्रियासिद्धिर्वोध्या आहंकारिकस्याऽपिश्रोत्रस्याऽकाशेनाऽधाराऽधेयभावोस्तिउपलक्ष
णमेतत्त्वग्वाय्वोः चक्षुस्तेजसोःरसनयोः घ्राणभूम्योःसंवंधेषुसंयमाद्दिव्यादींद्रियाणिश्रावणावेदनादयुक्तसंज्ञानिसंभवंतियैर्दिव्यगंधादीन्युग

उदानजयाज्जलपंककंटकादिष्वऽसंगउत्क्रांतिश्च ३९ समानजयाज्ज्वलनं ४० श्रोत्राऽकाशयोःसंवंधसंयमाद्दिव्यंश्रोत्रं ४१
कायाऽकाशयोःसंवंधसंयमाल्लघुतूलसमापत्तेश्चाऽकाशगमनं ४२ वहिरकल्पितावृत्तिर्महाविदेहाततःप्रकाशाऽवरणक्षयः
स्थूलस्वरूपसूक्ष्मान्वयाऽर्थवत्त्वसंयमाद्भूतजयः ४३॥ पज्जानातीत्यर्थः तयोःसंयोगंजित्वालघुनितूलाऽदौवातद्भावेनसमाधिनाल
घुकायोभूत्वाऽदौजलेविहरतिततऊर्णनाभितंतुषुविहरतिपश्चात्सूर्यरश्मिषुततोयथेष्टमाऽकाशेगच्छतीत्यर्थः॥देहेऽहंभावेसत्येवमेमनोवहिरस्त्वि
तिकल्पनयामनसोदेहाद्वहिर्वृत्तिलाभोभवतिसाकल्पिताविदेहाऽख्याधारणातयादेहेऽहंभावत्यागेसतिस्वतएववहिर्वृत्तिलाभोभवतिसेयमक २०
ल्पितामहाविदेहाऽख्याधारणाततःप्रकाशस्वभावस्यचित्तस्यक्लेशकर्माद्याऽवरणक्षयोभवतिततःसर्वज्ञत्वलाभइत्यर्थः॥पंचभूतानांस्थूलंदृश्यमा
नमऽवयवसंस्थानंपृथिवीत्वाऽदिजातिमत्क्रमेणैकैकन्यूनैःशब्दादिभिःपंचगुणैःस्थूलैर्युक्तमित्येकरूपंअथद्वितीयंतेषांस्वरूपंक्रमेणाका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ठिन्यस्नेहौष्ण्यप्रेरणासर्वगतत्वलक्षणंप्रेरणा वायोस्तृणादिवाहकत्वंअथ तृतीयंतेषांरूपंसूक्ष्मंकारणंपरमाणवः तेषांसूक्ष्माणिपंचतन्मात्रा।
णि अथचतुर्थंतेषांरूपंगुणत्रयंतद्धिस्वकारणत्वेनाऽन्वेतीत्यऽन्वयः सामान्यं अथपंचमंतेषांभूतानांरूपमऽर्थवत्त्वंभोगाऽपवर्गसामर्थ्यंगुणनिष्ठं
स्तेषुगुणाऽन्वयात्ऽगतंएवंभूतानांपंचरूपेषुकार्यस्वरूपहेतुषुस्थूलाऽदिक्रमेणसंयमाद्भूतानियोगिसंकल्पाऽनुसारीणिभवंतिवत्सानुसारि।
एयइवगावइत्यर्थः ततोभूतजयाद्योगिनोऽणिमाद्यऽष्टसिद्धयः प्रादुर्भवंतिपरमाणुतुल्यत्वमऽणिमा विभुत्वंमहिमातूलपिंडवल्लघुत्वंलघिमामेरुव
द्गुरुत्वंगरिमा अंगुल्या चंद्रस्पर्शनं प्राप्तिःसत्यसंकल्पत्वंप्राकाम्यंभूतनियंतृत्वंवशित्वंभूतस्रष्टृत्वमीशित्वमित्यऽष्टैश्वर्याणि अत्रप्राप्त्यंऽतानि स्थूल
संयमात्सिद्ध्यंतिस्वरूपसंयमात्प्राकाम्यंअवशिष्टंहेतुसंयमादितिविभागः कायसंपद्वक्ष्यतेतेनस्यकायस्यभूतधर्मैः काठिन्यादिभिरऽनभिघातश्चभूतजया

ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानऽभिघातश्च ४४ रूपतालावण्यवलवज्रसंहननत्वानिकायसंपत् ४५
ग्रहणस्वरूपाऽस्मितान्वयाऽर्थवत्त्वसंयमादिंद्रियजयः ४६ ततोमनोजवित्वंविकरणभावः प्रधानजयश्च ४७ त्सिध्यंतिये

नशिलांऽतःप्रविशंतिशीतोष्णाद्योनवाधंतइत्यऽर्थः॥ चक्षुःप्रियंरूपंलावण्यंसर्वांगसौंदर्यंवलंवीर्यंवज्रस्येवसंहननमऽवयवव्यूहेयस्यतद्भावोवज्रसंहननत्वंह
तुमतिप्रसिद्धंभूतजयाऽनंतरमिंद्रियजयोपायमाह॥ शब्दः षड्जादिः स्पर्शः शीतादिः रूपंपीतादिः रसोमधुरादिः गंधः सुरभ्यादिरितिसामान्यविशेषात्मकग्राह्य
ऽदिगोचराः पंचवृत्तयःकार्याः श्रोत्रादींद्रियाणांग्रहणानिप्रथमंरूपंप्रकाशकत्वंस्वरूपंतेषांद्वितीयंअस्मितालक्षणसात्विकाऽहंकारःकारणंतेषां
तृतीयंअन्वयाऽर्थवत्त्वेचतुर्थपंचमेव्याख्यातेतेषुपंचस्विंद्रियरूपेषुसंयमादिंद्रियजयोभवतिततःकिंतत्राह॥ मनोवत्कायस्याऽनुत्तमोगतिलाभोम
नोजवित्वंविदेहाऽनपेक्षाणांइंद्रियाणांदूरवात्याऽर्थज्ञानेविकरणत्वंविकरणभावः प्रधानस्याऽन्वयस्यचतुर्थरूपस्यजयः सर्वजगद्वशित्वमितिसिद्ध
यः इंद्रियजयाद्भवंतीत्यर्थः एताअणिमाद्याः प्रधानजयांताः सिद्धयोऽस्मिनशास्त्रेमधुमतीकाउच्यंतेमधुनएकदेशावदाऽस्वादयंतइतिमधुमतिकाः मधु।

यो॰टी॰ तुल्याद्वत्यऽर्थः यद्वास्थूलादिप्रधानां तत्वस्तु विषयाः योगजन्यर्तंभरप्रज्ञा मधु तत्प्रतीकं कारणं साक्षात्कृतं भूतेंद्रियजयद्वारा या सा तां मधुप्रतीकाः ए
प॰ वं संयमाज्ज्ञानक्रियासिद्धयः साक्षाच्छुद्धाद्वारा च अविवेकख्यात्यर्था उपन्यस्ताः संप्रति विवेकख्यातेः ख्यातंरसिद्धिमाह पूर्वोक्तस्वार्थसंयमे
२१ न निर्धूतरजस्तमोमलस्यांऽतःकरणस्य जये वशीकारसंज्ञायामः परस्या विरक्तौ स्थितस्य बुद्धिसत्वात्मनोर्भेदख्यातिर्जायते तन्मात्रस्य तदाऽवृत्ति
परस्य योगिनः सर्वेषां भावानां प्रधानतत्वपरिणामानां अधिष्ठातृत्वं नियंतृत्वं सर्वेषां भूतभवद्भाविनां ज्ञातृत्वं च सिद्ध्यति एषा विशोका नाम सिद्धिः अ
धुना विवेकख्यातेर्मुख्यां सिद्धिमाह तस्यां विशोकायां सिद्धौ वैराग्यात्तद्धेतौ विवेकख्याताव्यपि वैराग्यं परं भवति ततो दोषाणां क्लेशानां बीजं भ्रां
ति संस्कारस्तस्य क्षये सर्वात्मनातिरोभावे सति चित्तस्य परवैराग्यसंस्कारशेषतायां पुरुषस्य स्वरूपप्रतिष्ठत्वं कैवल्यं सिद्ध्यति इयं संस्कारशेषाऽ
ख्या सिद्धिः अत्र विघ्नोत्पत्तौ निरासोपायमाह चत्वारः खल्वऽमी योगिनः प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रांतभावनीयश्चेत त्राद्यः

सत्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च ४९ तद्वैराग्यादपि दोषबीजक्षये कैवल्यं ५० स्थान्यु
पमंत्रणे संगस्मयाऽकरणं पुनरनिष्टप्रसंगात् ५१ ॥ संयमे प्रवृत्तमात्रो न किंचित्परचित्तादिकं जानाति द्वितीयः संप्रज्ञातयोगेन मधुमती चित्तभू
मिमृतंभरा प्रज्ञाऽवस्थां लब्ध्वा भूतेंद्रियाणि साक्षात्कृतानि विजिगीषति तज्जयद्वारा पूर्वोक्ताः क्रमेण मधुप्रतीका विशोकाः संस्कारशेषा चेति तिस्रो भू
मीर्लब्धुकामः तृतीयस्तु जितभूतेंद्रियत्वान्महेंद्रादिभिरक्षोभ्यो लब्धभूमिद्वयो विशोकादिभूमिद्वयसिसाधयिषया स्वार्थे संयमयत्नवान् च
तुर्थस्तु भगवान्महानुभावो लब्धविवेकः तद्भूमित्रये विरक्तो विघ्नशंकाशून्यो जीवन्मुक्तास्त्वतुर्थभूमौ वर्तते यस्य सप्तधा प्रांतभूमिः प्रज्ञा व्याख्या २१
ता तत्राद्यस्य योगिनो देवनिमंत्रणयोग्यता नास्ति अतः परिशेषान्मधुभूमिको योगी द्वितीयो यस्तस्य स्थानिभिः तत्तत्स्थानस्वामिभिर्महेंद्रादिभि
रुपमंत्रणं प्रार्थनं क्रियते भोइहास्यतां स्वर्गादिस्थाने रम्यतां कमनीयेयं कन्या दिव्योऽयं भोगो रसायनमिदं जरामृत्युनिवारकमिदं कामगं यानं मि

त्वेवं प्रार्थने संगः कामः अहो ममायं योगप्रभाव इति स्मयस्तु न कर्तव्यः किंत्विस्थं तत्र दोषं भावयेत् घोरेषु संसारांगारेषु पच्यमानेन मया जन्ममृतिप्र
बंधचक्रारूढेन कथंचिदासादितः क्लेशकर्मांधकारविध्वंसी योगप्रदीपः तस्य चैते तृष्णायोनयो विषयवायवः प्रतिपक्षाः स खल्वहं लब्धालोकः
कथमनया मृगतृष्णया वंचितः तस्यैव पुनः पुनः प्रदीप्तस्य संसाराग्नेरात्मानमिंधनीकुर्यामिति स्वस्ति वः स्वप्नोपमेभ्यः कृपणप्रार्थनीयेभ्यः इत्ये
वं निश्चितमतिः समाधिं भावयेत् संगे पातित्यं स्मये हानकृत्यं मन्यस्य योगाः सिद्धिः ततो योगभ्रष्टस्य पुनः संसाराऽप्यानिष्टस्य प्रसंगात्संगस्मययोरक
रणं केवल्यविघ्ननिरासोपाय इत्यर्थः पूर्वं बुद्धिप्रतिबिंबितपुरुषस्य स्वार्थसंयमात्सार्वज्ञं विवेकज्ञानं उक्तं तत्रोपायांतरमाह॥ अभेद्यः कालभागः
सत्यः क्षणः अन्ये मुहूर्त्तादयः कालभागाः क्षणसमूहरूपाः असत्याः न हि क्षणानां समूहो वस्तु सन् तत्राय मस्मात्पूर्वः क्षण अयमुत्तरक्षण इति क्ष

क्षणतत्क्रमयोः संयमाद्विवेकजंज्ञानं ५१ जातिलक्षणदेशैरन्यताऽनवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः ५२

णानंतरेषां क्रमस्य पौ
र्वापर्यस्य संयमाद् अतिसूक्ष्माणां भेदसाक्षात्कारी विवेको भवति तेन च युगपद्विपरादीनां पुरुषाः तानां ज्ञानं साक्षात्कारात्मकं जायते इत्यर्थः इदं क्ष
णसंयमजं ज्ञानं सर्वविषयमित्यग्रेवक्ष्यते संप्रति सूक्ष्मं तस्य विषयविशेषमाह॥ अवच्छेदो निश्चयः लोके हि भावानां द्वयोर्भेदनिश्चयहेतवः तत्र देशे
न लक्षणेन च तुल्ययोर्गोगवययोर्जात्या भेदधीः देशजातिभ्यां तुल्ययोर्गवोः कृष्णश्वेतादिलक्षणेन भेदधीः जातिलक्षणाभ्यां तुल्ययोः आमलक
योः पूर्वोत्तरादिदेशभेदाद्भेदनिश्चयः यदा पुनर्योगिनो ज्ञानपरीक्षार्थं केनचित्पूर्वदेशस्थमामलकमुत्तरामलकदेशे विन्यस्योत्तरामलकमन्यत्रासक्ते
योगिन्य पहृतं तदा तयोरामलकत्वजातिरूपपरिणामादिलक्षणेन देशेन च तुल्ययोर्जात्यादिभिरन्यत्वनिश्चयासंभवात् ततः क्षणसंयमज
विवेकज्ञानादेवान्यत्वप्रतिपत्तिर्योगिनो भवति यस्मिन्क्षणे पूर्वामलकमुत्तरत्र विन्यस्तं तस्मात्प्राचीनक्षणेषु तस्मिन्पूर्वदेशस्थरूपपूर्वपरिणाममालां जानानो तरामल
केन स्यते पुक्षणे पूत्तरत्वपरिणाममालावलानया च क्षणक्रमज्ञो योगी तयोः पूर्वोत्तरत्वपरिणाममालाक्षणेभ्योऽस्य क्षणस्यानंतर्यं जानन्नधुनेदमुत्तरमितः प्राक्

पूर्वेणोत्तरमिति भेदं निश्चिनोतीत्यर्थः॥

यापूर्वं तत्तत्संयमात्सर्वज्ञतोक्ता सा प्रकारमात्रविषया यथा रसवत्यां निष्पन्नैः सर्वैर्व्यंजनैर्भुक्तमिति सर्वैर्व्यंजनप्रकारैर्भुक्तमिति गम्यते न तथा यथा पुनः पात्र
स्थैः सर्वैर्व्यंजनैरुपनीतं सर्वमशेषं भुक्तमित्युक्ते स्वरूपतः प्रकारतश्च निःशेषं भुक्तमिति गम्यते न तद्वदिदं क्षणसंयमजं विवेकज्ञानं सर्ववस्तुस्वरूपविष
यं सर्वथाविषयं सर्वप्रकारविषयं पुरुषतत्त्वावगाहित्वात्संसारसागरात्तारयतीति तारकसंज्ञमऽक्रमं युगपदेव करतलामलकवत्सर्वं समूहावलं
बनमित्यर्थः एवं विवेकख्यातिकाष्ठावधिकान् तत्तद्विभूतिफलान् संयमाननुपन्यस्य तादृशविवेकख्यातिकाष्ठास्तु वा माभूद्वा सत्वपुरुषान्यतासा
क्षात्कारमात्रं मुक्तये कल्पत इत्यभिप्रेत्याह॥ निरस्तसमस्तरजोमलस्य बुद्धिसत्वस्य विवेकख्यात्या संस्कारशेषस्य सर्ववृत्तिशून्यत्वं शुद्धिः पुरुष
स्यापि नित्यशुद्धस्य तदाकल्पितभोगशून्यत्वं शुद्धिः एवं तयोः शुद्धिसाम्ये सति कैवल्यं तत्तत्तद्विभूतयस्तु श्रद्धोत्पादनार्थमुपन्यस्ताः कैवल्यं तु
बुद्धिविलक्षणपुरुषसाक्षात्कारमात्रादविद्यानिवृत्त्याऽनागतदुःखानुत्पादरूपं सिध्यतीत्यर्थः॥ सर्वसाधनसिद्धीनां यास्यात्सिद्धिरनुत्तमा कैव

तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानं ५३ सत्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति ५५ इति विभूतिपादः
३ जन्मौषधिमंत्रतपःसमाधिजाः सिद्धयः १॥

ल्यरूपा तन्मात्रं सीतारामं नमाम्यहं प्रथमद्वितीयपादयोर्योगतत्साधने प्रतिपादिते तृतीये संयम
संज्ञमन्तरंगत्रयसंयमस्य लक्ष्याः परिणामभेदाः सिद्धयश्चोक्ताः तत्र काश्चिदतीतानागतज्ञानादिसिद्धयः श्रद्धाद्वारा कैवल्ययोगस्याङ्गं काश्चिदिन्द्रि
यजयादयः साक्षादङ्गं तारकसंज्ञि विवेकज्ञानसिद्धिर्योगस्य फलमिति निरूपितमिदानीं कैवल्यस्वरूपं प्राधान्येन प्रतिपादनीयं तदर्थं कैवल्यभा २२
गीयं चित्तं परलोकः क्षणिकविज्ञानातिरिक्तात्मा चित्तविकारसुखादिभोक्ता धर्ममेघश्च वक्तव्यः प्रासंगिकं चान्यदपि वक्तव्यमिति चतुर्थः पाद आरभ्यते तत्र प्र
थमं सिद्धचित्तेषु कैवल्ययोग्यं चित्तं वक्तुकामः पूर्वोक्तसिद्धीनां हेतुभेदात्पंचविधत्वमाह। जन्मना पक्ष्यादीनामाकाशगमनादिसिद्धिः कपिलादीनां च
सांसिद्धिकीत्युच्यते औषधिविशेषसेवया माण्डव्यादीनां मंत्रजपेन केषांचिदणिमादिसिद्धिः तपसा विश्वामित्रादीनां सिद्धिः एतास्वतस्त्रः सिद्धय

पूर्वजन्माभ्यस्तयोगजा एवजन्मादिनिमित्तेनव्यज्यंते अतएवयोगाभ्यासेविश्वासेनप्रवृत्तिरिह सिद्धाः दर्शनेऽपिजन्मांतरेसाफल्यात्समाधिजास्तु पूर्वपादेव्याख्या
ताः ननुतपःप्रभावादिहैवनंदीश्वरस्यश्रीगौरीवल्लभकटाक्षवीक्षणेनदेवशरीरपरिणामः श्रूयतेतत्रनतावदस्यनरदेहोदेवादिदेहस्योपादानंतस्मिन्स्थितेपरिणामा
ऽनुपयोगान्नष्टस्याऽहेतुत्वात् नाऽपितदवयवाएवोपादानंनरदेहमात्रहेतोर्विलक्षणकार्यकारित्वाऽयोगादित्याशंक्याह प्रधानादयः पृथिव्यंताः प्रकृतयस्तासांस
र्वत्रसत्त्वान्नरादिदेहावयवेषुतासामापूराद्धर्मादिनिमित्तानुरोधेनाऽवयवाऽनुप्रवेशाज्जात्यंतरपरिणामोयुज्यतेयथाऽग्निकणस्यप्रकृत्यनुग्रहाद्दहनादौवहु तृणा
दिमंडलव्यापित्वंतद्वदित्यर्थः ननुप्रकृत्यापूरोधर्मादिनिमित्तमपेक्षतेनवानचेत्सर्वत्रापूरापत्तिः नाद्यः धर्मादेः प्रवर्तकत्वेपुरुषार्थः प्रवर्तकइतिसिद्धांत
विरोधादित्यतआह निरीश्वरसांख्येहिपुरुषार्थएवाऽनागतः प्रकृतीनांप्रवर्तकः अस्माकंतुसेश्वराणांतदुद्देशेनेश्वरः प्रवर्तकः इत्युद्देश्यतयापुरुषा
र्थः प्रवर्तकइत्युच्यतेनिमित्तंतुतासांनप्रवर्तकंतत्कार्यत्वात् किंतुततोनिमित्ताद्वरणस्यप्रतिबंधस्यवाधोभवतिधर्मेणाधर्मनिरासेप्रकृतयः स्वयमे

जात्यंतरपरिणामः प्रकृत्यापूरात् २ निमित्तमप्रयोजकंप्रकृतीनांवरणभेदस्तुततःक्षेत्रिकवत् ३ (अत्रदृष्टांतमाह)। निर्माणचि
त्तान्यस्मितामात्रात् ४ प्रकृत्तिभेदेप्रयोजकंचित्तमेकमनेकेषां ५ ॥

वदेवादिपरिणा
मेप्रवर्तंतेपापातिशयेनपुण्यप्रतिबंधेसतितिर्यगादिपरिणामोयथानहुषस्यसर्पपरिणामः क्षेत्रिकवदितियथाक्षेत्रिकः कृषीवलोजलस्योन्नत
देशादिवरणभेदनमात्रंकरोतिततोजलंस्वयमेवकेदारांतरेप्रवर्ततेतद्वदित्यर्थः ननुयदायोगीयुगपद्भोगार्थंवहून्कायान्निर्मिमीतेतदा
तेषुचित्तानिकुतोभवंत्यतआह योगप्रभावान्निर्मीयंतइतिनिर्माणानिचित्तानियोगिसंकल्पाधीनप्रकृत्यापूरात्कायवदहंकारात्मकृतेजा
यंतइत्यर्थः तर्हिचित्तानांभिन्नभिन्नाऽभिप्रायत्वाद्योगिनोभोगाऽसिद्धिरित्यतआह निर्मितचित्तानांयोगीस्वभोगानुकूलप्रवृत्तिविशेषनियामकंचि
त्तंनिर्मिमीतेयोगबलात्तच्चित्तंतेषांनायकंभवतितेनभोगस्तदनुसंधानंयुज्यतेइत्यर्थः एवंजन्मादिभिः पंचविधानिसिद्धचित्तान्युक्तानितेष्वपवर्गभागी

धर्मादयः

पुरुषार्थ

तत्र तेषु जन्मादिजेषु यत्समाधिजं तदनाशयं क्लेशवासनाशून्यं मोक्षयोग्यमित्यर्थः योगिनश्चितवत्कर्मापि विलक्षणमित्याह ॥ वाङ्मनःसाध्यं सु
खैकफलकं शुक्लं कर्म स्वाध्यायतपःशीलानां भवति दुःखैकफलकं कर्म कृष्णं दुरात्मनां भवति सुखदुःखमिश्रफलकं बहिःसाधनसाध्यं शुक्ल
कृष्णं सोमयागादिरतानां भवति तत्र व्रीह्यादिवधेन पिपीलिकादिपरिपीडया दक्षिणादानादिपरानुग्रहेण च योगादिदं त्रिविधं कर्मेतरेषामयो
गिनां भवति योगिनस्तु संन्यासिनो बाह्यसाधनसाध्यकर्मत्यागान्न शुक्लाकृष्णकर्मक्षीण क्लेशत्वान्न कृष्णं योगजधर्मस्य फलमनभिध्यायेश्वरा
र्पितत्वान्न शुक्लं कर्माऽपि अतश्चित्तशुद्धिविवेकख्यातिद्वारा मोक्षैकफलकमशुक्लाकृष्णं कर्मेत्यर्थः कर्मणः प्रसंगाद्वासनाऽभिव्यक्तिफलमा
ह ततस्त्रिविधात्कर्मणो मरणकालानन्तरं जात्यायुर्भोगरूपविपाकदानायाभिव्यक्तो तस्य विपाकस्यानुगुणानां वासनानामभिव्यक्तिर्भवति न वि
रुद्धानामित्यर्थः देवत्वप्रापैर्ना चित्तप्रसुप्ता एव नरकभोगवासना भवति नासामभिव्यक्तो दिव्यभोगायोगादिति भावः ननु स्वर्गदेशे देवजन्मनि जा

तत्र ध्यानजमनाशयम् ६ कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषां ७ ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां ८
जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात् ९ ॥ तास्तद्भोगेभ्यो वासनाः कथं नरव्याघ्रादिजन्मसहस्रव्यव
धानानन्तरं पुनर्देवजन्मन्यभिव्यज्यन्ते अनन्तरजन्मपूर्ववासना एव पूर्वदिनवासनावत्कुतो न व्यज्यन्ते इत्यत आह यथाऽपि सुप्तोत्थितस्यानन्त
रं पूर्वदिनानुभवजवासनाः प्रायेणाभिव्यज्यन्ते अव्यवधानात् तथाऽप्यनादिसंसारे येन कर्मणा यज्जन्मनि भोगैर्वासनाः संचिताः तासां जन्म
कोट्या देशेन कल्पशतेन च व्यवहितानामपि तज्जातीयेन कर्मणा तज्जन्मनि पुनः प्राप्ते सति तेनैव कर्मणा जन्मनाऽभिव्यक्तानामानन्तर्यमव्यव
हितत्वं स्मृतिद्वारा भोगादिहेतुत्वमिति यावत् विजातीयकर्मारब्धानन्तरपूर्वजन्मवासनानां व्यंजकाभावात् प्रसुप्तैरेव व्यवहितानामपि कर्मजन्म
नोरभिव्यंजकयोः सत्त्वादभिव्यक्तिर्युक्ता न च विजातीयत्वेऽप्यव्यवधानादनन्तरपूर्ववासना एव ताभ्यां स्मृत्याद्यर्थमभिव्यज्यन्तामिति वाच्यं स्मृ

CC-0. In Public Domain. Digitization by eGangotri

संस्कारयोरेकरूपत्वादयमर्थः क्रियाज्ञानमन्यद्वा रागादिकं शक्त्यात्मनास्थितः संस्कारः स च स्वसमानविषयकक्रियास्मृत्यादिहेतुः क्रियासंस्का
रः क्रियात्मना ज्ञानसंस्कारः स्मृत्यात्मनाऽन्यसंस्कारोऽन्यात्मना परिणमत इति यावत् एवं स्मृतिसंस्कारयोरभेदेनैकविषयत्वेन चैकरूपत्वात् आनंत
र्यशक्तिः कार्यकारणभावो न विजातीययोः नहि व्यवधानं संस्कारस्य विरूपकार्यकारित्वमापादयति घटाऽनुभवजसंस्कारादनंतरमननुभूतस्मृत्या
पत्तेरिति ॥ ननु जन्मांऽतरितवासनाः न संतीति वदंतं चार्वाकं प्रत्याह। न केवलं तासां वासनानां आनंतर्यं किंत्वनादित्वमपीति चार्थः कुतः सदाऽहं भूया
समित्याऽऽशिषो मरणत्रासस्य नित्यत्वात्सर्वजनेष्वव्यभिचारादित्यर्थः इदमत्राकूतं जातमात्रस्य कंपाद्यऽनुमितो मरणत्रासो द्वेषदुःखस्मृतिम
स्मृतिः व्यभिचारात्कल्पयति सा च वासनां साऽपि मरणजदुःखाऽनुभवं सोऽस्मिन्जन्मन्यऽसंभाव्यमानो जन्मांऽतरं कल्पयत्यऽनादित्वसिद्धिरिति ननु दे
हस्याऽनात्मत्वे कस्य जन्ममरणत्रासः आत्मनोऽनाद्यंतस्याभयत्वादिति चेत् चित्तस्येति ब्रूमः तस्यैव त्व्यऽनादिवासनाऽनुविद्धस्य चित्तस्याऽहंकारि

तासामऽनादित्वं चाऽऽशिषो नित्यत्वात् १० हेतुफलाश्रयालंबनैः संगृहीतत्वादेषामऽभावे तदऽभावः ११

॥ कालेन विभुना सान्निदेह संकोचविकासशीलवृत्तिलाभो जन्म मृत्युपरमो मरणं तत्काले दुःखमित्याऽऽदि सर्वसंस
१० रः तत्त्वऽनादिवासनानां कथमुच्छेदस्तत्राह। नैताः पुरुषवदनाद्यः किंतु कार्या एवं प्रवाहानाद्यः अतः कारणोच्छेदादुच्छेदसंभवः न याहि पूर्ववृ
र्वभ्रमसंस्कारलक्षणाऽविद्याऽहमित्यस्मिताहेतुः सा च नरोऽहममेदमनिष्टमिति भ्रमहेतुः सोऽपि रागद्वेषयोः सो च परनिग्रहादिद्वारा धर्माऽधर्मयोः सो
च भोगे सोऽपि वासनासु ताः पुनर्भ्रमादिष्वऽनादिसंसारचक्रमऽनिशमाऽवर्तते तत्र वासनानां क्लेशकर्माणि हेतवः देहाऽऽयुर्भोगाः फलं चित्तमाश्रयः श
ब्दादिकमाऽलंबनं एतैः संगृहीतत्वादेषां क्रियायोगाष्टांगयोगजाविप्लवविवेकख्यात्याउच्छेदे सति कारणानामऽभावादुच्छेदो भवतीत्यर्थः ननु
सतां संस्काराणां कथमऽभाव इत्यऽत आह ॥ ११ ॥ ॥० १५१

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

यो॰टी॰ म॰ २४ नाऽसतामुत्पादो न सतां विनाशः नाऽसतो विद्यते भावो नाऽभावो विद्यते सत इति परमेश्वरगीतासु तेः वेदाहं समतीतानि वर्तमानानि चाऽर्जुन भविष्याणि
च भूतानीति वर्त्तमानवदतीताऽनागतस्य प्रत्यक्षवेद्यत्वोक्तेश्च न त्वसतः प्रत्यक्षवेद्यत्वं संभवति तस्मादतीताऽनागतं धर्मजातं धर्मिणि शक्तिरूपेणास्त्ये
व यत्परिणामत्रयसंयमाऽदिना योगिनः साक्षात्कुर्वन्ति कुलालादयश्च बुद्ध्वा वाऽलिख्य कुर्वन्ति यदन्वयी धर्मी स्थिर एक उक्तः ननु तर्हि वासनादिवं ध्वस
त्वात्तत्त्वज्ञानवैयर्थ्यमिति चेन्न धर्माणामनागताद्यध्वनां भेदाद्वर्त्तमानाध्वनि हि दुःखादिवासनाचित्रं साऽधिकारं चासंख्येयपरिणामशीलं चि
त्तं भोग्यताऽपन्नं बंधमुच्यते न त्वज्ञाने सति निरधिकारमतीताध्वनि प्रवेशितं प्रकृत्यात्मना सदपि पुनरुत्थानबीजस्य कर्तव्यपुरुषार्थस्य कृ
तत्वान्न पुनराऽवर्त्तत इत्यर्थः अतीताऽनागतं स्वरूपतोऽस्तीत्युक्तं तच्च किं स्वरूपमित्यत आह व्यक्ता वर्तमानाऽध्वानः सूक्ष्माः अतीताऽनागताध्वा
नः ते महदादयो घटादिविशेषान्ताः गुणात्मानः सत्त्वरजस्तमः स्वरूपा इत्यर्थः सर्वे भावाः सुखदुःखमोहात्मकगुणाऽन्वितत्वेन तत्प्रकृतित्वात्त

अतीताऽनागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम् १२ ते व्यक्तसूक्ष्मा गुणात्मानः १३ परिणामैकत्वाद्वस्तुतत्त्वम् १४

त्स्वरूपा एव यथा घटादयो मृदन्विता मृत्स्वरूपाः प्रकृतिविकारयोर्भेदाभेदरूपतादात्म्यात्तत्र गुणाः परिणामिनित्याः अन्ये सर्वे भावाः प्रति
क्षणपरिणामाः क्षणविध्वंसिनः पुरुषस्तु कूटस्थः तदुक्तं भाष्ये गुणानां परमं रूपं न दृष्टिपथमृच्छति यत्तु दृष्टिपथं प्राप्तं तन्मायेव सुतुच्छकमित्यैं
द्रजालिकवत्क्षणविध्वंसीत्यर्थः ननु यदि त्रयो गुणाः परिणामिनः तर्हि परिणामानां प्रत्येकमेकत्वं न स्यात् न हि मृत्तन्तुदुग्धानामेकः परिणामो दृ
ष्ट इत्यत आह ॥ बहूनामप्येकः परिणामो दृष्टः यथा रुमास्थले क्षिप्तानां गजाश्वादीनामेको लवणपरिणामः वर्त्तितैलाऽग्नीनामेको दीपपरिणामः २४
मृदादीनां त्वंगांगिताऽभावान्न परिणामैकत्वं गुणानां तु परिणामस्याऽङ्गांगीभावस्यैकत्वाद्वस्तुनो महदादेस्तत्त्वमेकत्वमुच्यते तत्र सत्वस्याऽङ्गि
त्वे गुणत्रयादेको महान् तस्मादेकस्मादुक्तः प्रधानादहंकारः तमःप्रधानात्त्वं च तन्मात्राणि प्रत्येकमेकत्ववंति भवंति अहंकारात्सात्त्विकाद्बुद्धी

न्द्रियाणि राजसात्कर्मेन्द्रियाणि उभयात्मकात्मनः एवं शब्दतन्मात्रस्यांऽगित्वे सत्याऽकाशः पंचतन्मात्राणामेकः परिणामः एवं स्पर्शरूपरसगंधतन्मा
त्राणां क्रमेणांऽगित्वे वाय्वऽग्निजलावनयः प्रत्येकं जायंते एकस्माद्बहवः परिणामास्तु बहुपरिणामवासनारूपशक्तिवैचित्र्यादित्यऽलं विस्तरेण ननु
क्षणिकविज्ञानात्मकचित्तातिरिक्तं वस्तु नाऽस्त्येव यत्प्रमेयं तद्विज्ञानाभिन्नं यथा विज्ञानं प्रमेयाश्च घटादयः अतः कस्यैकत्वनानात्वचिंता चित्तमेवस्व
ऽनादिसमनंतरप्रत्ययात्मकवासनाविचित्रं द्रव्यगुणात्मना भातीति वदंतं वौद्धं प्रत्याह तयोश्चित्तवस्तुनोर्विभक्तः पंथा भिन्नो मार्गः विज्ञानार्थयोर्भेद
इति यावत् कुतो वस्तुनः स्त्रीपिंडादेः साम्येऽपि चित्तानां भेदात् यदेकस्यां नार्यां पत्युः सुखविज्ञानं सपत्न्या दुःखविज्ञानं तदऽलाभे कामुकस्य मोहो विषा
दस्तद्विज्ञानं निष्कामस्योपेक्षाविज्ञानं सर्वेषां या त्वया दृष्टा सा मयाऽपि दृष्टेत्यऽवाधितप्रत्यऽभिज्ञानादेकं वस्त्वनेकं विज्ञानमिति तयोर्भेदः यदेकं तदऽने
केभ्यो भिन्नं यथा नीलविज्ञानं पीतविज्ञानेभ्यः एकं च वस्त्वतः स्वगोचराऽनेकविज्ञानेभ्यो भिन्नं न च प्रमेयस्य प्रमेकांयुक्तं एकत्वे विष

वस्तुसाम्येऽपि चित्तभेदात्तयोर्विभक्तः पंथा १५ नचैकचित्ततंत्रं वस्तु तदप्रमाणकं तदा किं स्यात् १६ ॥°

यविषयित्वविरोधाद्वास्त्वार्थोऽभावे विज्ञानानां नीलपीताद्याऽकारत्वाऽयोगाच्च न च प्रमेयात्मकवासनात्र हेतुरिति वाच्यं नष्टस्याहेतुत्वात् न चैकरूपादर्थ
त्वकथं चित्तवैचित्र्यमिति वाच्यम् अर्थस्य त्रिगुणत्वाद्धर्माऽधर्माऽविद्यापेक्षयार्थगतानां सत्वरजस्तमसामुद्रेकात्सुखदुःखमोहविज्ञानहेतुत्वं तत्त्व
ज्ञानाऽपेक्षया गुणानां साम्यादुपेक्षाहेतुत्वमिति युक्तत्वात्तस्मादस्ति विज्ञानाऽतिरिक्तोऽर्थः यत्तु कश्चिदाह अस्तु विज्ञानादऽन्योऽर्थः स तु जडत्वाद्विज्ञानग्रा
ह्यः प्रातिभासिको नाज्ञातोऽस्तीति स वक्तव्यः कुतस्तस्योत्पत्तिरिति ग्राहकविज्ञानाच्चित्तादिति चेत् किमेकचैत्रचित्तस्य घटवस्तु कार्यं उत चैत्रमैत्राद्यऽनेक
चित्तानां नाद्य इत्याह ॥ यद्येकचित्तस्य कार्यं घटवस्तु तदा तस्मिंश्चित्ते पटादिषु व्यग्रे तद्वस्त्वऽप्रमाणकं किन्नष्टं स्यादित्यऽर्थः नचेष्टापत्तिः पुनस्तद्दर्शने सो
ऽयमित्यऽवाधितप्रत्यभिज्ञानादेकस्य व्यग्रत्वेप्यऽन्येन दृश्यमानत्वाच्च तस्मान्न ॥

यो॰टी॰
म॰
सू॰

कचित्ततंत्रंवस्तुनाप्यऽनेकचित्ततंत्रंप्रातिभासिकस्यस्वप्नवदेकचित्ततंत्रत्वनियमात्पूर्वमेकेनदृश्यमानेघटेवहुचित्तैः पश्चात्संबंधेविलक्षणघटां
तरोत्पत्तिप्रसंगाच्चसामग्रीवैलक्षण्याभावात् किंचोदरदर्शनकालेपृष्ठभागोनास्तीत्युदरमऽपिनस्यात् तस्मान्नप्रातिभासिकंवस्तुकिंतुचित्तातिरिक्तंस्वतं
त्रमितिसिद्धं ननुसिद्धांतेविभुनाचित्तस्यसर्वसंबंधात्सदासर्वज्ञायेतेत्यत आह यद्यप्याऽहंकारिकत्वाच्चित्तेंद्रियाणिविभूनितथाऽपितेषामऽहंकारेसुज्ञानां
संबंधोविषयस्यस्फूर्त्तौवाहेतुः किंतुकर्मणाऽभिव्यक्तानांदेहस्थानांतथाचेंद्रियद्वारायेनाऽर्थेनचित्तस्योपरागः तस्मिन्नर्थेचित्तंस्वनिष्ठचित्प्रतिविंव
रूपांस्फूर्त्तिंधत्तेनमऽर्थंस्वाकारवृत्तिद्वाराबुद्धिस्थप्रतिविंवद्वारापुरुषत्वेनयत्तेनाऽन्यमितिवस्तुज्ञाताज्ञातंभवतिअतएवचित्तंतत्तदऽर्थोपरागमऽपेक्ष्यक
दाचिद्वस्तुजानातिकदाचिन्नेतिज्ञाताज्ञातविषयत्वात्परिणामीतिभावः तस्यात्मनोपरिणामित्वमित्यतआह॥पुरुषस्यहिक्षिप्तमूढादिसर्ववृत्तिकंचि
त्तंविषयः सयदिचित्तेनस्वविषयशब्दादिवत्पुरुषेणस्वसत्ताकालेनज्ञायेततदाचित्तवत्परिणामीस्यात्पुरुषः वृत्तिपरिणामंतत्तदाकारमऽपेक्ष्यतज्ज्ञा

तदुपरागाऽपेक्षित्वाच्चित्तस्यवस्तुज्ञाताऽज्ञातं १७ सदाज्ञाताश्चित्तवृत्तयस्तत्प्रभोःपुरुषस्याऽपरिणामात् १८ नतत्स्वभासंदृश्यत्वात्

तृत्वापातात् तदाकिंपरिणामिद्वयेनेतिचित्तादऽन्यःपुरुषोनस्यात्सदैवतुस्वसत्ताकालेज्ञायमानाश्चित्तवृत्तयोभोग्याः शब्दाद्याऽकाराः तस्यभोग्य १९
स्यप्रभोर्भोक्तुरऽपरिणामित्वंज्ञापयतिसाक्षिणोऽपरिणामित्वादेवहिस्वयंसदाज्ञाताभवतिनाऽन्यथेऽत्यऽर्थः ननुचित्तमेवक्षणिकंस्वप्रकाशंस्वस्याऽ
र्थयोर्भासकमऽस्तुकिंसाक्षिणेत्यत आह॥ रूपीघटइतिवत्सुख्यऽहंक्रुद्धोऽहंशांतंमेमनइतिदृश्यत्वाच्चित्तंस्वभासंस्वप्रकाशंनभवतीत्यऽर्थः अयं २५
भावः किमिदंस्वप्रकाशत्वंनतावत्स्वाऽभिन्नप्रकाशक्रियाकर्मत्वंक्रियाकर्मणोरैक्यायोगात्नहिगतिर्गम्यतेकिंतुग्रामः नाऽपिपुरुषवच्चित्तस्यस्व
भिन्नप्रकाशाऽविषयत्वंतुक्रुद्धंमेमनइत्यऽनुभवविषयत्वादऽतोदृश्यत्वात्स्वातिरिक्तद्रष्टृकंचित्तंसोऽहमितिप्रत्यभिज्ञानात्क्षणिकमितिकिंत्व

१९ श्रीकृष्णायनमः॥ १९

क्षणिकवादिन एकस्मिन्नेव क्षणे चित्तचैत्ययोरुभयोरवधारणं न संभवतीऽत्यर्थः तथाहि घटमहमद्राक्षमिति चित्तार्थयोः स्मरणं तयोरनुभवज
न्यं तत्र चित्तक्षणे तयोः कथमनुभवः न च चित्तमेवोभयानुभव इति वाच्यं अर्थस्य चित्तजन्यत्वेऽर्थक्षणे चित्तासत्त्वादजन्यत्वेन समकालत्वेऽपि तदुत्प
त्तितादात्म्ययोरभावेन तद्ग्राह्यत्वायोगात् असंबद्धग्राहित्वे चित्तस्य सर्वज्ञतापत्तिः उक्तं हि सौगतैः अतदुत्पन्निरस्तदात्मा चेतनेन गृह्यते इति न
वा चित्तस्यानुभवं दृश्यत्वादित्युक्तं नापि चित्तस्य स्वार्थयोरनुभवद्वयं अनिक्षणिकस्योत्पत्तिव्यतिरिक्तव्यापाराभावात् उक्तं हि भूतिर्येषां क्रिया
सैव कारकं सैव चोच्यते इति न चैकस्माद्व्यापारभेदं विना कार्यभेदो युक्तः न वा स्वभिन्नं ज्ञानं ज्ञेयं च युगपत्कर्तुं शक्यं तस्मात् साक्षिणो वचित्तचैत्ययोरनुभ
व इति सिद्धं ननु मास्तु चित्तं स्वदृश्यं चित्तान्तरेण दृश्यतां किं साक्षिणेत्यत आह॥ यदि नीलाकारं चित्तं चित्तान्तरेण दृश्यं तदा तदपि बुद्धिरूपं चित्ता।

एकसमये चोभयानवधारणं २० चित्तान्तरदृश्यत्वे बुद्धिबुद्धेरतिप्रसंगः स्मृतिसंकरश्च २१ चितेरप्रतिसंक्रमायातदाकारता
पत्तौ स्वबुद्धिसंवेदनं २२॥ सान्ययानुबुद्ध्या साप्यन्ययेत्यनवस्थापातात् न च द्वित्रास्त्रि चतुरः पंच षड्वा चित्तात्मानो यास्या इति नानवस्थेति वा।
च्यं ग्राहकचित्तस्यानिश्चये ग्राह्यचित्तानिश्चयात् गेहे घटो दृष्टो न वेति संशये न दृष्ट इति व्यतिरेकनिश्चये चार्थनिश्चयादर्शनेन ज्ञानचित्तानिश्चयस्या
र्थानिश्चयाहेतुत्वात् तत्तदनन्तचित्तानामनुभवे चानन्तचित्तस्मृतीनां संकरश्च प्राप्नोति स्मृत्यानन्त्यादशक्यग्रहत्वात् ग्राहकाभावाच्चेयं नीलचित्तस्मृ
तिरियं पीतचित्तस्मृतिरिति विभागो न स्यादित्यर्थः चित्तानां समत्वाद्दीपानामिव ग्राह्यग्राहकत्वासंभवश्च अतः साक्षिवेद्यं चित्तमिति सिद्धं ननु कूटस्थ।
स्य साक्षिणश्चितेर्न क्रियापूर्वकसंबंधाभावात्तेन कथं संवेद्यमित्यत आह॥ यथा बुद्धेः क्रियया घटादिसंश्लेषः प्रतिसंक्रमोऽस्ति परिणामित्वा
न्न तथा चित्तेर्बुद्धौ प्रतिसंक्रमः अपरिणामित्वात् किंतु सूर्यस्य जले प्रतिबिंबवच्चितेर्बुद्धौ प्रतिबिंबे सति बुद्धेश्चिदाकारतापत्तौ स्वस्य भोग्याया बुद्धेः सं
वेदनं भवति चिच्छायाग्राह्यत्वसंबंधेन चिदुपरक्तं चित्तं चिद्वेद्यमित्यर्थः अप्रतिसंक्रमायाश्चितेः सान्निध्यात्तस्यां चितेराकारश्छाया यत्र तत्तद्भावा

फलौ सत्यां स्वभोग्यबुद्धिसंवेदनमिति योजना ननु यदि चित्तातिरिक्त आत्माऽस्ति तर्हि कथं केषांचित् चित्तमेवात्मेति भ्रम इत्याशंक्य चित्तस्य सर्वार्थग्रहणसामर्थ्यं तेषां भ्रमबीजमाह द्रष्टा पुरुषस्तेन तः दृश्यं शब्दाद्यचेतनमिति तत्सर्वं चेतनाऽचेतनमर्थो विषयो यस्य तत्सर्वार्थं तत्र तत्सान्निध्याच्चिद्रूपतामिव प्राप्तं द्रष्टृचिदुपरक्तं द्रष्टृविषयं भवति इंद्रियादिद्वारा दृश्योपरक्तं तदाकारं भवति तथा च भोग्यशब्दाद्याकारं सुखदुःखादिपरिणामलक्षणभोगात्मकं दृश्यमपि चित्तं चित्प्रतिबिम्बाऽभेदादात्मेति भ्रमः सौगतानां युक्तः चित्तस्य जपाकुसुमाद्यर्थाकारग्रहशीलाऽभिजातस्य स्फटिकमणिकल्पस्य दृश्याऽकारग्राहित्वाच्चित्ताऽतिरिक्तोऽर्थो नास्तीति विज्ञानवादिनां भ्रमः अत्रेत्थं विवेकः चित्तस्य भोग्यत्वाद्भोक्ताऽन्यः स्वीकर्तव्यः स नित्योदिता चिच्छक्तिरित्युच्यते द्विधा चिच्छक्तिः नित्योदिताऽभिव्यंग्या चेति तत्र नित्योदितायाः कूटस्थचिच्छक्तेः चित्तसत्त्वाऽभिव्यंग्या चित्प्रतिबिम्बरूपा सुखादिसारूप्यमापन्ना चिच्छक्तिर्भोग इत्युच्यते स द्विविधः स भोगः चिदवसानतारूप एकः परिणामलक्षणोऽपरः तत्राऽभिव्यंग्या चिच्छक्तिराद्यः पुरुषस्य भोगः अपरः सुखादिपरिणामो बुद्धेः प्राप्तचैतन्याया इति द्वित्वं बुद्धिपुरुषयोः

द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थं २३ तदसंख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात् २४ ॥

तत्संविविच्य विध्वस्तसमस्तमलजालं निश्चलप्रदीपशिखाकारं समाहितं प्रशांतवाहि चित्तं पुरुषसत्तां निश्चिनोतीति तात्पर्यं इतश्च चित्तादन्यो भोक्तास्तीत्याह यद्यपि क्लेशकर्मविपाकवासनाभिरनंताभिश्चित्रं सुखाद्याश्रयतया भोक्तृकल्पं चित्तं तथाऽपि परस्य निरुपचरितचित्स्वभावस्याऽर्थौ भोगाऽपवर्गौ साधयतीति परार्थं भोग्यमेव न भोक्तेति यावत् कुतः संहत्य देहेंद्रियादिसहकारिभिर्मिलित्वा भोगादिकार्यकारित्वात् यन्मिलित्वा कार्यकारि तत्परार्थं यथा गृहादि न हि स्तंभादिभिः संहत्य गृहं स्वस्य वसतिं करोति किंतु परस्मै विष्णुमित्राय एवं गुणा अपि बुद्ध्यादिकं परार्थं कुर्वंतीति युक्तं अत एव पुरुषशेषत्वाद्गुणा उच्यंते तथा च सत्त्वादयः परार्थाः संहत्यकारित्वाद्गृहवदित्यस्य हेतोः पक्षधर्मताबलाद्गुणेभ्योऽसंहतः शुद्धो निष्कलः स्वार्थश्चिन्मात्रः परः सिध्यति यो यस्य भोक्ता स तेनाऽसंहतो यथा गृहस्वामीति व्याप्तेः गुणभोक्तुरपि परार्थत्वेऽनवस्थानात् पुरुषान्न परं किंचिदिति श्रुतेश्च तस्माद्यस्य भोगाऽपवर्गौ गुणमयबुद्ध्या कर्तव्यौ सुखदुःखाभ्यां योऽनुकूलनी ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

यः प्रपतिकूलनीयश्च स भोक्ताऽस्तीति सिद्धं इयता सूत्रजालेन जन्मादिसिद्धिं च्चित्तेषु मोक्षयोग्यचित्तं निर्द्धार्य कर्मवासनाप्रपंचपूर्वकं विज्ञानभिन्नोऽर्थस्सा
यनेन परलोकादिप्रपंचं परलोकिनं च भोक्तारं निर्धारयत् अधुना कैवल्यं निरूपयितुं तद्योग्यमधिकारिणं दर्शयति पूर्वसुकृतवलात्कस्य चित्तु क
षधौरियस्यात्मभावे तत्त्वभावना जिज्ञासा भवति क्वाहं कस्य कुतो वेति तस्याऽधिकारिणः पूर्वोक्तविवेके नतु द्वेऽन्यस्मिन्मात्रः पुरुषोऽहमिति विशेषदर्शि
नः तत्त्वजिज्ञासा विनिवर्त्तते इच्छायाः स्वविषयलाभनिवर्त्यत्वात् यस्य तु नास्तिकस्य देहाद्भेदे वाऽन्यो भोक्ता नाऽस्तीत्यनात्मन्यात्मभाव नाऽऽरूढ्यसो नाधि
कारी यस्तत्त्वजिज्ञासुः सोऽधिकारीतिभावः ननु तत्त्वजिज्ञासोर्विशेषदर्शिनोऽनंतरं कीदृशं चित्तमित्यत आह पूर्वं बुद्ध्याऽदावात्मभ्रमदशायां यच्चित्तं वि
षयनिम्नं संसारप्राग्भारमासीत् तदिदानीं निवृत्तभ्रमस्य योगिनश्चित्तं विवेकनिम्नं दृग्दृश्ययोर्भेदो विवेको निम्न आलंबनभूमिर्यस्य तद्विवेकनिष्ठमि

विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः २५ तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तं २६ तच्छिद्रेषु प्रत्ययांतराणि संस्कारेभ्यः
२७ हानमेषां क्लेशवदुक्तं यथा २८॥

तियावत् अत एव कैवल्यप्राग्भारोऽवधिर्यस्य तत्कैवल्यप्राग्भारं कैवल्यफलाऽवसानं धर्ममेघाख्यध्यानरतं
भवतीत्यर्थः नन्वीदृशस्य चित्तस्याहं ममेति व्युत्थानप्रत्ययाः कुतो भवंतीत्यत आह विवेकख्यातिरूपप्रसंख्यानपरस्यान्वहं क्षीयमाणेभ्यो व्युत्थानसं
स्कारेभ्यः प्रसंख्यानच्छिद्रेष्वभिव्यक्तेभ्यः प्रत्ययांतराणि व्युत्थानरूपाणि भवंतीत्यर्थः ननु सत्यपि प्रसंख्याने व्युत्थानसंस्काराः कार्यायोतिष्ठंति चेत्
कस्तेषां हानोपाय इत्यत आह अविद्यारागादिक्लेशाः क्रियायोगतनूकृताः तत्तदवसरलब्धप्रसराः प्रसंख्यानदहनदग्धाः पुनश्चित्ते संस्कारं न प्रसुवते एवं
व्युत्थानसंस्कारा अपि विवेकख्यात्यपरिपाकदशायां प्रत्ययांतराणि कुर्वाणाः परिपक्वप्रसंख्यानदहनदग्धात्मबीजभावा प्रसवधर्माणो भवंतीति क्लेश
वदेतेषां हानमुक्तं वेदितव्यमित्यर्थः एवं प्रसंख्यानेन व्युत्थानस्य निरोधमुक्त्वा प्रसंख्यानस्यापि निर्बीजयोगापेक्षया व्युत्थानरूपस्य निरोधोपायमाह २८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योटी
मू २७

षड्विंशतितत्त्वान्यालोचयतः सत्त्वपुरुषान्यताख्यातिर्याजायतेसर्वाधिष्ठातृत्वाद्यऽवांतरफलाततप्रसंख्यानंतत्राप्यऽकुसीदस्यकुत्सितेषुविषये
षुसीदतीतिकुसीदोरागः तद्रहितस्यसर्वात्मनाविवेकख्यातिरेवसंततिरूपोधर्ममेघसंज्ञः समाधिर्भवतिसचखल्वऽशुक्लाकृष्णंधर्मकैवल्यफलं
मेहतिसिंचतीतिधर्ममेघइत्युच्यतेप्रसंख्यानेवैराग्याद्धर्ममेघेसतिपरवैराग्योदयात्प्रसंख्यानस्यनिरोधोभवतीतिभावः इमंक्रमंस्फुटयति ॥ ततोध
र्ममेघात्क्लेशानांपंचानांसवासनानांतन्मूलानांकर्मणांचनिवृत्तिर्भवतीत्यर्थः ॥ आवृणवंतिचित्तमित्यावरणारजस्तमोमयाः क्लेशकर्मरूपामलाः स
र्वेतेआवरणाश्चमलाश्चसर्वावरणामलाः तैर्धर्ममेघध्यानेनाऽपेतस्यज्ञानस्यशुद्धबुध्याऽलोकस्याऽनंत्याज्ज्ञेयंचेतनाऽचेतनात्मकंसर्वमऽल्पमे
वभवतियथाशरदिअशेषघनादिमलाऽपेतेनभसिसर्वतःप्रद्योतमानप्रचंडमार्तंडप्रकाशपटलस्यघटादयःप्रकाश्याः अल्पाभवंतितद्वदऽत्यंतनि
र्मलस्यबुद्धिसत्वस्यप्रकाशस्यकिंचनामयन्नगोचरइतिभावः सेयंधर्ममेघस्यपराकाष्ठादर्शिताअतएववर्धमानवह्निरिवयंतइतिस्तुत्यऽत्यासर्वानेवज्ञेयान्म

प्रसंख्यानेऽप्यकुशीदस्यसर्वथाविवेकख्यातिर्धर्ममेघः समाधिः २९ ततः क्लेशकर्मनिवृत्तिः ३० तदासर्वावरणमलापेतस्य
ज्ञानस्याऽनंत्याज्ज्ञेयमऽल्पम ३१ ततः कृतार्थानांपरिणामक्रमसमाप्तिर्गुणानां ३२ ॥ इतिप्रकाशायत्यऽपिधर्ममेघइत्याह अयमेव
हिधर्ममेघपरिपाकोज्ञानप्रसादः करतलीकृताऽमलकवत्सुरूपंनिर्दोषमऽपरोक्षीकुर्वन्निर्मलजलांतर्मत्स्यानिवजडाविशुद्धप्रकृतिविकारदृ
श्यविषयाऽत्तर्गताशुद्धिविनाशादिदोषान्प्रकटयनवितृतपस्विनोनिर्बीजयोगाऽनुष्ठानिधिमाऽपादयन्परवैराग्यमित्युच्यतेतन्निदंपरवैराग्यंक्लेश
न्समूलकाषंकषन्कुशलाऽकुशलांश्चकर्माशयानसमूलघातंनिहंतुमुत्सहतेतथापिगुणानांस्वतःपरिणामशीलत्वात्तताद्दशमऽपिपुरुषंप्रतिदेहेंद्रियाणिपरिणामक्रमोऽ
नुवर्तेतामितितत्राह ततोधर्ममेघफलीभूतपरवैराग्यात्मकाऽनंतज्ञानाऽनंतरंगुणानांभोगविवेकख्यातिरूपपुरुषार्थकरणात्प्रागपरिणामानांमहदादिघटांऽ
तानांसृष्टावानुलोम्येनप्रलयेघटः पृथिव्यांलीयतेपृथिव्यप्सुअप्सुतेजसीत्यादिप्रातिलोम्येनचक्रमआसीत्तस्यपरिसमाप्तिरेवतंपुरुषंप्र

तिगुणानांपुरुषार्थत्वात् अनागताध्वा हि पुरुषार्थो गुणानांप्रवर्त्तकस्तस्मिन् कृते गुणानक्षणमपि स्थातुमुत्सहन्ते इति भावः क्रमशब्दार्थमाह ॥
क्षणाः कलाशास्तेषु समाहितबुद्धिना क्रमो ज्ञेयः तत्र क्षणप्रतियोगी क्रम इति स्वरूपनिर्देशः क्षणयोः पौर्वापर्यं क्रमः क्षणौ प्रतियोगिनौ निरूपकौ यस्य
स क्षणप्रतियोगी एवं क्षणिकपरिणामक्रमो मन्तव्यः तत्र प्रमाणमाह परिणामापरान्तनिर्ग्राह्य इति मृद्पिंड घटकपालचूर्णकणानांप्रत्यक्षपरिणा
मानां पूर्वान्तः पिंड अपरान्तः कण इति पूर्वान्तराऽवधिग्रहणेन क्रमो निश्चित्य ग्राह्यो भवति पिंडाऽनन्तरं घट इ[illegible] क्रमोऽत्र प्रत्यक्षः क्वचित्तु रक्षितवस्त्रा
दौ पुराणतादर्शनेन पूर्वान्तनवत्वपरिणाममाऽभ्यक्षणेक्षणे पुराणतायाः सूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूलस्थूलतरस्थूलतमत्वेन जायमानाया भेदं
ज्ञात्वा नवत्वानन्तरं सूक्ष्मतमपुराणता तदनन्तरं सूक्ष्मतरपुराणतेति क्रमोऽनुमेय इत्यर्थः नन्वयं क्रमः किमनित्येष्वेवास्ति उत नित्येष्वपीति प्रश्न
श्चेदस्ति नित्येष्वपीति विरामः तत्र नित्या द्विविधाः कूटस्थनित्याः पुरुषाः परिणामिनित्याः गुणाः यस्मिन्धर्मिणि धर्मलक्षणाऽवस्थाभिः परिणम्यमा

क्षणप्रतियोगी परिणामाऽपरान्तनिर्ग्राह्यः ३३ श्री ॥०

ने स्वरूपं न विहन्यते तत्परिणामिनित्यता तत्राऽनित्येषु बुद्ध्यादिषु धर्मिषु रागादिपरिणामक्रमस्य पूर्वान्तभावेऽप्यपरान्तः पुरुषसाक्षात्कारोस्तीति
क्रमः तेषु साऽवधिकः गुणेषु परिणामिनित्येषु परिणामक्रमो निरवधिकः मुक्तपुरुषान्प्रत्युपरमेऽपि बद्धान्प्रत्यविच्छेदात् ननु सर्वे पुरुषा मुच्य
न्ते न वा आद्ये प्रधाने परिणामः साऽवधिकः द्वितीये तत्त्वज्ञानाविश्रंभ इति तत्राहुः सांख्याचार्याः अस्ति त्रिविधः प्रश्नः एकान्तवचनीयः विभज्यवचनीयः
अवचनीयश्चेति तत्राद्यो यथा किमयं सर्वो जातो मरिष्यतीति प्रश्नः स एकान्ततो वक्तव्यः मरिष्यत्येवेति त्वया कृतस्तु द्वितीयः स विभज्य वक्तव्यः य
स्य तत्त्वख्यातिः स मुच्यते नाऽन्य इति एवं च जन्तूनामानन्त्यात्पुराणादौ सर्गप्रलयाऽनन्त्यश्रवणाच्च न सर्वमुक्तिः तृतीयस्तु प्रधानपरिणामक्रमः समाप्यते न
वेति प्रश्नः अयमुत्तराऽनर्हः अशक्यावधारणत्वात् यद्वा कुशलस्याऽनवान्संसारक्रमः अकुशलस्य नेति व्याकरणीयोऽयं प्रश्नः इति तस्मात्सदा परिणामिगु

नित्येषुगुणेषुक्रमवत्परिणामभेदाऽदर्शिक्रमः कूटस्थनित्येषुपुरुषेषुबुद्ध्यादिपरिणामभेदारोपात्कल्पितः क्रमोनवास्तवइतिसर्वमऽवदातं अधुनाशास्त्रप्रतिपाद्ययोगफलंकैवल्यंदर्शयति कृतभोगाऽपवर्गाणांकृतकृत्यानांबुद्ध्यादिगुणानांप्रातिलोम्येनप्रसवः व्युत्थानसमाधिपरवैराग्यसंस्कारा मनसिलीयंतेमनश्चास्मितायांलीयतेसामहतिमहत्तत्वंगुणेष्विति प्रलयः तत्प्रधानस्यकैवल्यंपुरुषविशेषउपचर्यते यद्वाचितिशक्तिश्चित्स्वभावापुरुषव्यक्तिः स्वरूपमात्रेणप्रकर्षेणनिष्ठतीतिस्वरूपेप्रतिष्ठापुनर्बुद्ध्याद्यऽनर्थेनात्यंतिकवियोगइतियावत तदिदंपुरुषस्यनित्यस्यनित्यशुद्धाऽसंगस्यप्रकाशस्यकैवल्यमितिरमणीयंसोत्रइतिशब्दःशास्त्रपरिसमाप्तिदर्शनाऽर्थः यद्वा गप्रणवप्रतिपत्तिदहनः सर्वांतरापाटवींदग्ध्वास्वात्मनिबोधदीपमचलं

पुरुषार्थशून्यानांगुणानांप्रतिप्रसवः कैवल्यंस्वरूपप्रतिष्ठावाचितिशक्तिरिति ॥ ३४ ॥०

स्तुतेतमःपाटनम् यत्रन्यस्तसमस्तकर्मजनयेद्योगंतदंऽगंविनावंदेसिद्धिभुवंतमीशऽमनिशंकैवल्यदंराघवं यत्प्रसादलवः स्तुतेमोक्षाद्याः सर्वसंपदः २९
उमाधवंमहेशानंतंकाशीनिलयंभजे फणींद्रसूत्रसंबद्धाव्यासवाङ्मणिभूषिता महाङ्मौक्तिकीमालास्यात्सदारामपादयोः ३ क्वाहंप्रमादनिरतः क्वा
त्सल्यंगुरोरिदं नूनंमहात्मनांदीनेस्वतश्चित्तंकृपाऽन्वितं ४ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंदभगवत्पूज्यपादशिष्यश्रीरामानंदसर
स्वतीकृतौसांख्यप्रवचनेयोगमणिप्रभायांकैवल्यपादश्चतुर्थः समाप्तः सम्वत १९३० ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीकाशीविश्वनाथपुरीमेढुंढराजगणेशकेपाससदाऊन्नग्निहोत्रीकेसिद्धविनाय
कयंत्रमे योगसूत्रमणिप्रभाटीकासंयुक्तछापागया जिस्कोलेनाहोयसदाऊन्नग्निहो
त्रीकेदुकानपरमिलेगा ॥ योगसूत्रमणिप्रभाटीकासमाप्तः ॥० ॥० ॥० ॥०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu